# shrImatsunItibhAgavatam

# શ્રીમત્સુનીતિભાગવતમ્

## Document Information

Text title : sunItibhAgavatam

File name : sunItibhAgavatam.itx

Category : vishhnu, krishna, vishnu

Location : doc_vishhnu

Author : Sagara Ramacharya

Proofread by : PSA Easwaran

Latest update : October 7, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીમત્સુનીતિભાગવતમ્

શ્રીકૃષ્ણાય નમઃ ।

પ્રથમઃ સ્કન્ધઃ ।

લક્ષ્મીસદ્દયિતે પયોભૃદસિતે સંદત્તસદ્વાઞ્છિતે
દોષૌઘૈ રહિતે ગુણૈર્વિલસિતે મુખ્યાનિલાન્તર્ગતે ।
સર્વૈરપ્યજિતે સદવ્યવહિતે નારાયણાખ્યાન્વિતે
બ્રહ્માદ્યૈર્વિનુતે દૃઢં મમ હિતે કૃષ્ણે મનોઽસ્ત્વચ્યુતે ॥ ૧॥

નિપીય યદ્ભાગવતામૃતં સજ્જનોઽગ્ર્યસંસારભયં જહાતિ ।
બ્રહ્માદિવન્દ્યં પ્રણમામિ વેદવ્યાસં હરિં મધ્વહૃદબ્જવાસમ્ ॥ ૨॥

સુદુર્ગમૈર્દુષ્ટવચસ્તમિસ્રૈર્નિગૂહિતો ભાગવતાર્થ ઉચ્ચૈઃ ।
પ્રકાશિતો યેન સદુક્તિભાભિઃ સ મધ્વભાનુર્હરતાત્તમો મે ॥ ૩॥

પ્રબોધયદ્બાલમમિ સુમધ્વશાસ્ત્રં બુધેન્દ્રૈરપિ દુર્વિબોધમ્ ।
યેનાઞ્જસા સંવિવૃતં નિષેવે જયપ્રદં તં જયતીર્થરાજમ્ ॥ ૪॥

આનન્દતીર્થોક્તિમહાનખાગ્રૈર્વિદાર્ય દુર્વાદિજનાન્ ધરણ્યામ્ ।
જહાર સન્માર્ગગતાન્તરાયાન્સ વ્યાસરાટ્ સિંહવરોઽવતાન્મામ્ ॥ ૫॥

રમ્યા યદીયા બહવો નિબન્ધા અદ્યાપિ લોકસ્ય હરન્તિ હૃત્સ્થમ્ ।
તમો વિતન્વન્તિ ચ મઙ્ગલં માં સ પાતુ જીવોત્તમતીર્થવર્યઃ ॥ ૬॥

ગોકર્ણસત્ક્ષેત્રવરેઽનવદ્યઃ શ્રીવિઠ્ઠલં કોઙ્કણવિપ્રવન્દ્યઃ ।
અપૂજયદ્યો રઘુચન્દ્રતીર્થઃ સંજુષ્ટગઙ્ગાદિસમસ્તતીર્થઃ ॥ ૭॥

યતીશ્વરાદ્યોઽખિલલોકહૃદ્યો વિરક્તિભૂપઃ પરિભૂતદોષઃ ।
શાસ્ત્રાબ્ધિચન્દ્રો હરિભક્તિસાન્દ્રો ભવેત્પ્રસન્નઃ પરમો ગુરુર્નઃ ॥ ૮॥

લક્ષ્મીશભક્તો બહુધર્મસક્તો વિવૃદ્ધસમ્પત્પરિનાશિતાપત્ ।
સદાતિદાન્તઃ પ્રગુણઃ પ્રશાન્તઃ સ તિમ્મપાખ્યઃ કૃતસાધુસખ્યઃ ॥ ૯॥

દ્વિજોઽચ્યુતારાધનતઃ સુપુત્રં લેભે ગુણાઢ્યં ભુવિ સર્વમિત્રમ્ ।
મહાબુધં સાગરવેઙ્કટેશં સચ્છાસ્ત્રવિજ્ઞં તપનપ્રકાશમ્ ॥ ૧૦॥

બ્રાહ્મણ્યમાસ્થાપ્ય બુધાઃ સમસ્તા યેનૈવ દુસ્તર્કભૃતો નિરસ્તાઃ ।
આનન્દિતઃ કોઙ્કણવિપ્રસાર્થઃ પ્રમોદિતઃ શ્રીરઘુનાથતીર્થઃ ॥ ૧૧॥

સદ્બ્રહ્મસૂત્રોત્તમભાષ્યટીકાટીકા કૃતા તત્ત્વસુકૌસ્તુભાખ્યા ।
ધર્મા મહાભાગવતા જનેષુ સંસ્થાપિતા યેન ચ ભૂર્યુપાયૈઃ ॥ ૧૨॥

પ્રદર્શિતો યેન ચ સાધુમાર્ગસ્તિરસ્કૃતોઽભૂદ્ભુવિ દુષ્ટવર્ગઃ ।
દત્તા દ્વિજેભ્યઃ સકલાશ્ચ વિદ્યા વિસ્તારિતા કીર્તિરથાનવદ્યા ॥ ૧૩॥

યેનોપદિષ્ટં શુભમુત્તમેભ્યઃ શ્રીમધ્વશાસ્ત્રં બહુશો જનેભ્યઃ ।
વ્યર્થં કૃતં ચૈકમપિ સ્મ નાહઃ પ્રસાદિતઃ શ્રીરમણો નૃસિંહઃ ॥ ૧૪॥

તસ્ય પ્રિયાયામથ શાન્તવાચ્યાં કોનેરિરામૌ તનયૌ પ્રજાતૌ ।
બભૂવતૂ રાઘવલક્ષ્મણૌ સન્મહાનુરાગાવિવ બુદ્ધિમન્તૌ ॥ ૧૫॥

તં સદ્ગુણં સાગરવેઙ્કટેશં વિપશ્ચિદાશ્ચર્યવરં પ્રણમ્ય ।
જ્યેષ્ઠં ચ કોનેરિબુધપ્રબર્હં સદ્વૈષ્ણવાગ્ર્યાનખિલાંસ્તથૈવ ॥ ૧૬॥

શ્રીકૃષ્ણભક્તાનુચરઃ સલક્ષ્મીનારાયણપ્રેરણયૈવ રામઃ ।
મુદે મુકુન્દસ્ય ચ વૈષ્ણવાનાં સુનીતિસદ્ભાગવતં કરોતિ ॥ ૧૭॥

દયાલવઃ સાધુજના ગુણજ્ઞા વિમત્સરાઃ સદ્ગુણશાલિનશ્ચ ।
તુષ્યન્તુ મે વીક્ષ્ય કૃતિં સમસ્તાઃ અહં યથા સ્યાં નિતરાં કૃતાર્થઃ ॥ ૧૮॥

અજ્ઞસ્ય બાલસ્ય કૃપાસ્પદસ્ય પ્રવર્તમાનસ્ય સુદુષ્કરેઽર્થે ।
સંગૃહ્ણતઃ સ્વલ્પપદૈઃ પ્રભૂતમર્થં ચ સઙ્કોચનિષક્તબુદ્ધેઃ ॥ ૧૯॥

નમ્રત્વભાજો મમ સર્વસન્તો વાત્સલ્યવન્તોઽન્યગુણેષુ તુષ્ટાઃ ।
ન્યૂનાધિકં કાવ્યકૃતિશ્રમજ્ઞાઃ કિમપ્યુદારા સ્ખલનં સહધ્વમ્ ॥ ૨૦॥

સૂતોક્તં કિલ નારદસ્તુતમભૂદ્યત્સત્પદં યઃ સ્વયં
વ્યાસઃ ફલ્ગુનભીષ્મયોઃ પ્રિયતમો ભક્તેષ્ટકૃદ્ધર્મજઃ ।
પ્રોચે યદ્ગતિમર્જુનો વિહરતઃ ખિન્નશ્ચ પાર્થા યયુઃ
શર્મોઽયં કલિજિત્પરીક્ષિદભજત્કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૨૧॥

વર્ણિતં પ્રથમે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૨૨॥

ગ્રાહ્યા વિદ્યોત્તમા હીનજન્મનોઽપિ વિમત્સરૈઃ ।
શ્રીમદ્ભાગવતં સૂતાચ્છુશ્રુવુઃ શૌનકાદયઃ ॥ ૨૩॥

અદર્શ્યમપિ સંદર્શ્યં તત્રૈવેચ્છાવિવૃદ્ધયે ।
શૂદ્રાત્મને હરી રૂપં નારદાય ન્યદર્શયત્ ॥ ૨૪॥

મનસ્તુષ્ટિકરં કાર્યશેષં ધીમાન્ન શેષયેત્ ।
ચક્રે ભાગવતં વ્યાસો નારદોક્તોઽખિલાર્થકૃત્ ॥ ૨૫॥

કૃતં પરેણ યત્કર્મ કાર્યા તદુચિતા ક્રિયા ।
બ્રહ્માસ્ત્રે દ્રૌણિનોત્સૃષ્ટે તન્મુમોચ ધનઞ્જયઃ ॥ ૨૬॥

દ્વિજસ્યાકાર્મણઃ કાર્યો નિગ્રહો હનનં વિના ।
મણિં કૃષ્ણોદિતો દ્રૌણેર્હૃતવાન્ન શિરોઽર્જુનઃ ॥ ૨૭॥

ન ભવેન્મહતોઽપ્યુક્તૌ વિશ્રમ્ભઃ પક્ષપાતિનઃ ।
પ્રબોધિતોઽપિ કૃષ્ણાદ્યૈર્ભીષ્મં પપ્રચ્છ ધર્મરાટ્ ॥ ૨૮॥

વાઞ્છિતાદધિકં પુણ્યકૃતોઽભીષ્ટં પ્રસિધ્યતિ ।
ભીષ્મસ્યાસીત્પુરઃ કૃષ્ણો મુમૂર્ષોરુત્તરાયણે ॥ ૨૯॥

ખેદે પ્રાપ્તેઽપિ નો મોચ્યમશ્રુ કર્મણિ મઙ્ગલે ।
કૃષ્ણે નિર્યાતિ નેત્રામ્બુ ન્યરુન્ધન્ પાણ્ડવસ્ત્રિયઃ ॥ ૩૦॥

જ્યેષ્ઠમધ્યમનીચાશ્ચ માનનીયા યથોચિતમ્ ।
સ્ત્રિયઃ પ્રજાશ્ચ પિત્રાદીન્ભગવાન્સમમાનયત્ ॥ ૩૧॥

સ્થિતિજ્ઞઃ સ્વોચિતં કુર્યાત્સ્વબુદ્ધ્યા વાન્યચોદિતઃ ।
ધૃતરાષ્ટ્રઃ સભાર્યોઽગાદ્વનં વિદુરબોધિતઃ ॥ ૩૨॥

ક્લેશો ન કાર્યઃ શ્રીવિષ્ણુવશત્વાત્સંપદાપદોઃ ।
પિત્રાદિશોકં તત્યાજ ધર્મજો નારદોદિતઃ ॥ ૩૩॥

નિમિત્તૈરેવ ધીમદ્ભિર્ભવિષ્યદવગમ્યતે ।
દૃષ્ટોત્પાતોઽવદદ્ભીમં ધર્મરાડ્ભગવદ્ગતિમ્ ॥ ૩૪॥

વ્યર્થેશબલહીનસ્ય બહુસાધનતા મતા ।
ગાણ્ડીવાદ્યર્જુનસ્યાસીત્કૃષ્ણસ્ત્રીરક્ષણે વૃથા ॥ ૩૫॥

યસ્મિન્ દેશે ન સુહૃદો ન મિત્રં તત્ર નો વસેત્ ।
શ્રુત્વાર્જુનોક્તાં કૃષ્ણસ્વધામાપ્તિં પાણ્ડવા યયુઃ ॥ ૩૬॥

દુષ્ટ ઉત્તમવેષોઽપિ સતામાતનુતે વ્યથામ્ ।
પીડયામાસ ગોયુગ્મં કલિર્નૃપતિલાઞ્છનઃ ॥ ૩૭॥

રક્ષ્યઃ પૂર્વમનમ્રોઽપિ ખલોઽપિ પતિતઃ પદોઃ ।
કલયેઽદાદ્વધોદ્યુક્તઃ પરીક્ષિત્સ્થાનપઞ્ચકમ્ ॥ ૩૮॥

શ્રાન્તોઽતિક્ષુધિતો વેત્તિ સ્વયોગ્યં ન વિવેક્યપિ ।
મુનેરંસે મૃતં સર્પં પરીક્ષિન્નિદધે રુષા ॥ ૩૯॥

ત્યજ ગર્વં જય ક્રોધં હિતં બ્રૂહિ ભજ ક્ષમામ્ ।
દત્તશાપં સુતં રાજ્ઞે પ્રણિનિન્દ મુનિઃ ક્ષમી ॥ ૪૦॥

પ્રત્યાસન્ને મૃતેઃ કાલે વિહાયાન્યદ્ધરિં ભજેત્ ।
શ્રુતશાપોઽચ્યુતં ભેજે પરીક્ષિન્મુનિસમ્મતઃ ॥ ૪૧॥

બ્રવીતિ ચતુરઃ પૃષ્ટઃ સન્નેવાદરતઃ પરૈઃ ।
પૃષ્ટઃ પરીક્ષિતા રાજ્ઞા શ્રીશુકઃ પ્રત્યભાષત ॥ ૪૨॥

લક્ષ્મીશોરુમાતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસન્દ્વિગુણિતૈઃ સ્કન્ધોઽન્તમાદ્યોઽગમત્ ॥ ૪૩॥

ઇતિ સુનીતિભાગવતે પ્રથમસ્કન્ધઃ સમાપ્તઃ ॥

---

દ્વિતીયઃ સ્કન્ધઃ ।

સંપ્રોક્તા ચ શુકેન વાઞ્છિતકરી યદ્ધારણોચેઽબ્જજો
યદ્વીર્યં ચ યદીરિતાઃ પ્રસસૃજુર્બ્રહ્માણ્ડમગ્ર્યં સુરાઃ ।
યઃ સદ્બ્રહ્મવતારભાગસુરહૃત્સંપ્રાપ્ય બોધં વિધિ-
ર્યસ્માત્સર્વજગત્સસર્જ હિતકૃત્કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

બ્રહ્માદિપ્રણુતે વિચિત્રચરિતે વિજ્ઞાનદાનોદ્યતે
સદ્રક્ષાનિરતે ગુણૌઘભરિતે નિઃશેષદોષોજ્ઝિતે ।
વ્યાસે વાગમૃતેઽનિશં પ્રમુદિતે શ્રીમધ્વહૃત્સંસ્થિતે
ભક્તિર્મેઽત્યુચિતે  સદાપ્રતિહતે સ્યાત્સત્યવત્યાઃ સુતે ॥ ૨॥

દ્વિતીયે વર્ણિતં સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।

ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

ક્ષિપ્રં પ્રવૃત્તયે બ્રૂયાત્ પણ્ડિતઃ ફલનિશ્ચયમ્ ।
જગાદ ધારણાં ધાતૃસ્મૃતિલબ્ધિકરી શુકઃ ॥ ૪॥

સ્વયોગ્યતાનુસારેણ પ્રવર્તન્તે મનીષિણઃ ।
કેચિદ્ભજન્તિ વૈરાજં હૃત્સ્થં રૂપં હરેઃ પરે ॥ ૫॥

પરિપૃચ્છેદવિજ્ઞાતમહઙ્કારસમુજ્ઝિતઃ ।
સ્વાજ્ઞાતં નારદસ્તત્ત્વમપૃચ્છચ્ચતુરાનનમ્ ॥ ૬॥

કાર્યં કર્તુમશક્તોઽપિ શક્નુયાચ્છ્રેષ્ઠચોદિતઃ ।
બ્રહ્માણ્ડં સસૃજુર્વિષ્ણુપ્રેરિતાઃ સંહતાઃ સુરાઃ ॥ ૭॥

દુષ્ટાન્ જહિ સતો રક્ષ સન્માર્ગમનુદર્શય ।
વરાહાદ્યવતારોઽભૂદેતદર્થં જનાર્દનઃ ॥ ૮॥

સાધને સત્યપિ જ્ઞાનં વિના કાર્યં ન સિધ્યતિ ।
જગત્કૃતિદૃશે બ્રહ્મા હર્યાદિષ્ટસ્તપોઽચરત્ ॥ ૯॥

ન તુષ્યતિ મનઃ કસ્ય પરમાદ્ભુતદર્શને ।
સ્વલોકસંસ્થિતં વેષ્ણું દૃષ્ટ્વા તુષ્ટોઽનમદ્વિભુઃ ॥ ૧૦॥

કિમલભ્યં ભવેત્પુંસઃ સુપ્રસન્ને મહાત્મનિ ।
પ્રીતાત્સકલવિજ્ઞાનં સ્વયમ્ભૂઃ પ્રાપ્તવાન્ હરેઃ ॥ ૧૧॥

સમસ્તમપિ કુર્વીત સ્વામ્યનુગ્રહભાઙ્નરઃ ।
સસર્જ નિખિલં વેધા હરિણેક્ષાપ્રચોદિતઃ ॥ ૧૨॥

સમ્યક્ પરહિતં સન્તઃ કુર્વન્ત્યેવાપ્યનર્થિતાઃ ।
બ્રહ્માચરચ્ચ ભદ્રાર્થં પ્રજાનાં નિયમાન્યમાન્ ॥ ૧૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્વરો વિલસિતઃ સ્કન્ધો દ્વિતીયોઽગમત્ ॥ ૧૪॥

ઇતિ સુનીતિભાગવતે દ્વિતીયસ્કન્ધઃ સમાપ્તઃ ॥

---

તૃતીયઃ સ્કન્ધઃ ।

મૈત્રેયો નિજગાદ યાત્પરકથા બ્રહ્માસૃજચ્ચોદિતો
યેનાશેષમથાસુરં સમવધીદ્યોઽભૂદ્ધિરણ્યાક્ષહૃત્ ।
ભક્તાભીપ્સિતદો વરાહતનુભાગ્યઃ કર્દમસ્યેષ્ટકૃત્
સાક્ષાદ્યઃ કપિલો હિતં હ્યકથયત્કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

લક્ષ્મીશં ભજતે જગદ્ભયહૃતે દ્વૈપાયનાજ્ઞાધૃતે
મોહં નાશયતેઽસુરાન્ વિજયતે સચ્છાસ્ત્રમાતન્વતે ।
સાધૂનુદ્ધરતે પ્રધાનમરુતે મધ્વાખ્યયા રાજતે
ગીર્વાણેષ્ટકૃતે નમો ગુણવતે તસ્મૈ સદા શ્રીમતે ॥ ૨॥

તૃતીયે વર્ણિતં સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

હિતમપ્યુપદેષ્ટવ્યં ન મૂર્ખેભ્યો વિશારદૈઃ ।
ચકાર વિદુરસ્તીર્થયાત્રાં ભ્રાતૃજધિક્કૃતઃ ॥ ૪॥

ન કાર્યોઽપરિહાર્યેઽર્થે શોકો વિજ્ઞાનશાલિભિઃ ।
શ્રુત્વોદ્ધવાત્સુહૃન્નાશં નાતનોદ્વિદુરઃ શુચમ્ ॥ ૫॥

પ્રાપ્તં વિદ્યાર્થિનં શાન્તં શ્રેયોઽર્થી ન પરિત્યજેત્ ।
મૈત્રેયો માધવાદિષ્ટો વિદુરં પ્રત્યબોધયત્ ॥ ૬॥

અજ્ઞાનં સમ્ભવત્યેવ કદાચિન્મહતામપિ ।
નાત્માનમપિ નાભ્યબ્જજાતો વિધિરબુધ્યત ॥ ૭॥

મહાનપિ વિના સેવામભીષ્ટં ન દદાત્યહો ।
જ્ઞાનાર્થં પ્રણુતો વિષ્ણુર્બ્રહ્મણે તપ  આદિશત્ ॥ ૮॥

કૃતેઽનિષ્ટકૃતાં મૂલોન્મૂલને સ્વેષ્ટભાગ્ભવેત્ ।
પીત્વા સહામ્ભસા વાયું ધાતા લોકાન્ વિભક્તવાન્ ॥ ૯॥

બાલસ્ય રોદનાદન્યદ્બલં નાસ્તીષ્ટસાધનમ્ ।
નામાનિ બ્રહ્મણો રુદ્રઃ સ્થાનાનપ્યાપ્તવાન્ રુદન્ ॥ ૧૦॥

અચીર્ણતપસા પુંસા પ્રજા સાધ્વી ન લભ્યતે ।
રુદ્રસૃષ્ટાં પ્રજામુગ્રાં વીક્ષ્યાદિશદજસ્તપઃ ॥ ૧૧॥

આચરન્તિ મહીયાંસઃ કર્મ દુષ્ટવિમોહકમ્ ।
ઇચ્છન્નિવ વિધિર્વાચં તત્યાજ તનયોક્તિતઃ ॥ ૧૨॥

યતેત પિતૃશુશ્રૂષાકૃતયેઽનુક્ત આત્મજઃ ।
પ્રજાવનાય ચાદિષ્ટો વિધાત્રાઽઽનન્દિતો મનુઃ ॥ ૧૩॥

કુર્યાદતિપ્રિયસ્યેષ્ટં પ્રાગેવ વચસાર્થનાત્ ।
વરાહો બ્રહ્મનાસોત્થોઽસુરં હત્વા ક્ષિતિં ન્યધાત્ ॥ ૧૪॥

તાવદ્વિનીતો લજ્જાવાઞ્જનો યાવન્ન કામુકઃ ।
કશ્યપસ્યાહરદ્વાસઃ સન્ધ્યાયાં રતયે દિતિઃ ॥ ૧૫॥

અકાલચરિતં કર્મ મહાનર્થફલપ્રદમ્ ।
દુષ્પુત્રૌ ભાવિનૌ પ્રોચે કશ્યપો રતિકૃદ્દિતિમ્ ॥ ૧૬॥

વિનાશકાલે સમ્પ્રાપ્તે વિપરીતા મતિર્ભવેત્ ।
જયેન વિજયેનાપિ સંરુદ્ધાઃ સનકાદયઃ ॥ ૧૭॥

સર્વૈરપ્યનુમન્તવ્યં પ્રભોરનુમતં હિ યત્ ।
ભૃત્યશાપવિમોક્ષોઽભૂદ્વિષ્ણૂક્તોઽનુમતો દ્વિજૈઃ ॥ ૧૮॥

ધીમાનવગતે કાર્યતત્ત્વે ન લભતે ભયમ્ ।
દિતિગર્ભાદ્ભિયં દેવા મુમુચુઃ કઞ્જજોદિતાઃ ॥ ૧૯॥

રક્ષન્ કાલાનુસારી સ્વં ગણયેન્ન પરાભવમ્ ।
નિલીના નિર્જરાઃ પ્રેક્ષ્ય હિરણ્યાક્ષં રણોદ્યતમ્ ॥ ૨૦॥

ઇચ્છન્તિ કલહં દુષ્ટાઃ શાન્તિમિચ્છન્તિ સજ્જનાઃ ।
વરુણો હરિમેવોચે હિરણ્યાક્ષસ્ય યુદ્ધદમ્ ॥ ૨૧॥

દુરુક્તિવાદો માયાયાં ન સ્યાદ્દુર્વાર્તિકારકઃ ।
હિરણ્યાક્ષો વરાહેણ બ્રહ્મોક્તેન વિનાશિતઃ ॥ ૨૨॥

અજ્ઞાત્વા કુર્વતેઽનિષ્ટં સ્વસ્વરૂપં નિવેદયત્ ।
બ્રહ્મણા બોધિતા જગ્ધું પ્રવૃત્તા યક્ષરાક્ષસાઃ ॥ ૨૩॥

તદેવ વિસૃજેત્સ્વસ્ય યદર્થં સ્યાત્પરાભવઃ ।
વિસસર્જ વિધિર્વિષ્ણુપ્રોક્તો જઘનવિગ્રહમ્ ॥ ૨૪॥

સ્યાદત્યારાધનાત્પ્રાપ્યં પ્રાર્થિતાદધિકં પ્રિયમ્ ।
દયિતાર્થી તપઃપ્રીતાત્પ્રાપેષ્ટં કર્દમો હરેઃ ॥ ૨૫॥

પ્રીણયેત્સ્વાન્તિકં પ્રાપ્તં પૂજયા વચનૈરપિ ।
મનોઃ સ્વાયંભુવસ્યૈવં કર્દમઃ પ્રીતિમાવહત્ ॥ ૨૬॥

પ્રાર્થિતઃ સન્નવાપ્નોતિ સ્વાભીષ્ટં સુકૃતી નરઃ ।
દેવહૂતિં મુનિર્લેભે કર્દમો મનુનાર્થિતઃ ॥ ૨૭॥

સ્યાન્નોપસ્કરણત્યક્તમિષ્ટમપ્યતિહર્ષદમ્ ।
દેવહૂતિર્ધવે તુષ્ટ ઐચ્છદ્રતિગૃહદિકમ્ ॥ ૨૮॥

સિદ્ધિર્મનોરથાદેવ ક્ષણેન સ્યાન્મહીયસામ્ ।
કર્દમો નવરૂપઃ સન્ વિમાનેઽરમત સ્ત્રિયા ॥ ૨૯॥

નિજેપ્સિતં નિરુધ્યાપિ કુર્યાત્સ્વજનવાઞ્છિતમ્ ।
ભાર્યાર્થિતઃ સુતે જાતે તનયાઃ કર્દમો દદૌ ॥ ૩૦॥

અવાપ્ય બૃહતોઽનુજ્ઞાં કૃતં કાર્યં શુભપ્રદમ્ ।
સદ્ગતિં કપિલાજ્ઞપ્તઃ પરિવ્રાટ્ પ્રાપ કર્દમઃ ॥ ૩૧॥

સમસ્તૈઃ પ્રભુણા હીનૈઃ કાર્યં કર્તું ન શક્યતે ।
નોદતિષ્ઠદ્વિરાડ્વહ્નિપૂર્વેષ્વનુગતેષ્વપિ ॥ ૩૨॥

સન્માર્ગ એવ લોકાનામચ્છિન્નસુખસાધનમ્ ।
કપિલોદિતમાર્ગેણ હરિં પ્રાપ મનોઃ સુતા ॥ ૩૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતે સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાર્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસસ્ત્રિગુણિતં સ્કન્ધસ્તૃતીયોઽગમત્ ॥ ૩૪॥

ઇતિ સુનીતિભાગવતે તૃતીયસ્કન્ધઃ સમાપ્તઃ ॥

---

ચતુર્થઃ સ્કન્ધઃ ।

અત્રેર્દક્ષસુયજ્ઞનાશનકૃતો રુદ્રસ્ય સર્વાર્ચિત-
શ્ચક્રે યશ્ચ મુદં ધ્રુવાય પરમં પ્રીતઃ પદં યો દદૌ ।
અઙ્ગસ્યાપિ પૃથોરભીષ્ટમકરોદ્યોઽભૂત્પ્રચેતાઃ પ્રિયો
મુક્તો યત્કૃપયા પુરઞ્જનનૃપઃ કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

શ્રીવિષ્ણું નમતે પ્રિયં વિદધતે ગ્રન્થાન્ બહૂન્ કુર્વતે
મધ્વોક્તિં સ્તુવતે ખલાન્નમયતે ધૈર્યં મહાભૂભૃતે ।
સંભગ્નદ્વિષતે સતે ભગવતે સાધૂન્ જનાન્ રક્ષતે

નિત્યં શ્રીજયતીર્થરાણ્મુનિયતે તુભ્યં નમો ધીમતે ॥ ૨॥

ચતુર્થે વર્ણિતં સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

મહોદ્યોગેન સિધ્યન્તિ કાર્યાણ્યતિમહાન્ત્યપિ ।
ચન્દ્રં દુર્વાસસં દત્તં લેભેઽત્રિસ્તપસા સુતાન્ ॥ ૪॥

અવમાનં કરોત્યેવ સ્વાવમોઽપ્યવમાનિતઃ ।
દક્ષો રુરોધ રુદ્રસ્ય યજ્ઞભાગમનુત્થિતેઃ ॥ ૫॥

એકદા નારભેતૈવ વિદ્વેષં બહુભિઃ સહ ।
નન્દિશપ્તેષુ વિપ્રેષુ સદક્ષેષ્વશપદ્ભૃગુઃ ॥ ૬॥

ન શુભં વાશુભં કુર્યાત્પત્ની ભર્ત્રા નિવારિતા ।
સાતી ગતા મખસ્થાનં દક્ષેણાનાદૃતાભવત્ ॥ ૭॥

પ્રાણાનપ્યુત્સૃજેન્નૈવ શ઼ૃણુયાચ્છ્રેષ્ઠનિન્દનમ્ ।
રુદ્રાવજ્ઞાકરં દક્ષં સતી વીક્ષ્ય જહાવસૂન્ ॥ ૮॥

કુર્યાદુપદ્રવપ્રાપ્તૌ જ્ઞાતાયાં તત્પ્રતિક્રિયામ્ ।
ઋભુભિર્ભૃગુરીશસ્ય પાર્ષદાન્ સંન્યવારયત્ ॥ ૯॥

સંપ્રેષ્યો વિષમે કાર્યે સમર્થઃ સ્વસમો ભટઃ ।
દક્ષયજ્ઞક્ષયાયેશો વીરભદ્રં સમાદિશત્ ॥ ૧૦॥

શ્રેષ્ઠાવજ્ઞાકૃતઃ પુંસો નાનુકૂલો ભવેદ્બુધઃ ।
ભગોઽદૃગ્ભૃગુરશ્મશ્રુઃ પૂષા દન્તોજ્ઝિતોઽભવત્ ॥ ૧૧॥

પુનર્યથૈવ નોત્તિષ્ઠેદ્ધન્યાદ્યુક્ત્યા  તથા રિપુમ્ ।
દક્ષિણાગ્નૌ જુહાવેશશ્છિત્વા દક્ષપશોઃ શિરઃ ॥ ૧૨॥

અપકારિષુ રુષ્ટસ્ય સામ્ના સંનાશયેદ્રુષમ્ ।
દેવૈર્નિવેદિતો બ્રહ્મા રુદ્રસ્યાશમયત્ક્રુધમ્ ॥ ૧૩॥

પૂર્વસ્થિતિં પ્રપન્નોઽપિ પ્રાપયેન્નાપરાધિનઃ ।
પૂષાદીનાં સ્વનિર્વાહં ચક્રેઽન્યાવયવૈઃ શિવઃ ॥ ૧૪॥

સંદૃષ્ટઃ પૂર્વપુણ્યેન પૂજનીયોઽખિલૈઃ પૃથક્ ।
પ્રાદુર્ભૂતં હરિં દક્ષયજ્ઞે સર્વે પ્રતુષ્ટુવુઃ ॥ ૧૫॥

કાર્યાકાર્યે ન જાનાતિ કાન્તયા વિજિતઃ પુમાન્ ।
સુરુચ્યાક્ષિપ્ત ઉત્તાનપાદેનોપેક્ષિતો ધ્રુવઃ ॥ ૧૬॥

કોપિતો દુષ્કરમપિ કુર્યાત્ખિન્નોઽન્યબોધિતઃ ।
અગમત્તપસે બાલઃ સુનીત્યા પ્રેરિતો ધ્રુવઃ ॥ ૧૭॥

પરીક્ષ્ય માનસં સમ્યક્પશ્ચાત્કાર્યવિધિં વદેત્ ।
નારદઃ સુસ્થિરં મત્વ ધ્રુવમૂચે તપોવિધિમ્ ॥ ૧૮॥

મહાત્માઙ્ગીકૃતં સર્વલોકાનાં દુસ્ત્યજં ભવેત્ ।
ધ્રુવેણ સ્વીકૃતે પ્રાણરોધે વિશ્વસ્ય સોઽભવત્ ॥ ૧૯॥

શીઘ્રાં સન્તુષ્ટિમભ્યેતિ શિશુનાઽઽરાધિતઃ પુમાન્ ।
વરં સ્થાનં ધ્રુવાયાદાદ્વાસુદેવો સુરાર્થિતઃ ॥ ૨૦॥

કૃતાપરાધા હન્તવ્યા બહવોઽપિ મહાશ્રયાઃ ।
હતોત્તમા ધ્રુવેણાજૌ ધનદાનુચરા હતાઃ ॥ ૨૧॥

નિર્વૈરો વિગતક્રોધો મહતાં માનદો ભવેત્ ।
ધ્રુવો મનૂક્તિભિઃ શાન્તઃ કુબેરાદ્વરમગ્રહીત્ ॥ ૨૨॥

આત્મનો હિતકર્તારં કાર્યે જાતે ન વિસ્મરેત્ ।
સ્થાનં ધ્રુવો વિમાનેન ગચ્છન્ માતરમસ્મરત્ ॥ ૨૩॥

વિહીનઃ સદપત્યેન ધર્માત્માપિ વિનિન્દ્યતે ।
અશ્વમેધેઽઙ્ગરાજસ્ય દેવા ન જગૃહુર્હવિઃ ॥ ૨૪॥

દુષ્ટસઙ્ગતિતો રક્ષ્યા બાલ્યે બાલા શુભાર્થિભિઃ ।
લબ્ધ ઇષ્ટ્વા હરિં વેનો મૃત્યુસઙ્ગાદધર્મ્યભૂત્ ॥ ૨૫॥

સુત ઉલ્લઙ્ઘિતસ્વાજ્ઞે ગચ્છેદ્દેશાન્તરં પિતા ।
ત્યક્તાજ્ઞેઽઙ્ગઃ શઠે વેને સર્વાન્ હિત્વા યયૌ નિશિ ॥ ૨૬॥

હન્યાત્સ્વવર્ધિતમપિ દુષ્ટમુત્પથગામિનમ્ ।
નિજઘ્નુર્મુનયો વેનં સ્વાભિષિક્તં કૃતાગસમ્ ॥ ૨૭॥

ગુણા એવ પ્રપૂજ્યન્તે મહત્વં વયસા વૃથા ।
વેનાઙ્ગાત્પ્રાગભૂજ્જાતો નિષાદો ભૂપતિઃ પૃથુઃ ॥ ૨૮॥

મહતઃ સન્નિધાનેન માનયન્ત્યખિલા જનાઃ ।
અભિષિક્તાય વર્માદિ બ્રહ્માદ્યા પૃથવે દદુઃ ॥ ૨૯॥

લજ્જામવાપ્ય ગુણિના નિન્દનીયાત્મનઃ સ્તુતિઃ ।
સૂતાદ્યા પૃથુરાજેન સ્વસ્તોત્રાદ્ધિનિવારિતાઃ ॥ ૩૦॥

પરોપજીવનાયૈવ વર્ધયેદાત્મસમ્પદઃ ।
પ્રજાન્નાર્થં પૃથુર્ભીતાં પ્રણતાં પ્રદુદોહ ગામ્ ॥ ૩૧॥

સુખં ન લભતે કોઽપિ ધર્મવિઘ્નકરઃ પુમાન્ ।
પૃથુવાજિહરં શક્રમૃત્વિજો હોતુમુદ્યતાઃ ॥ ૩૨॥

નાચરેદ્ધર્મમપ્યગ્ર્યં મહતાં કીર્તિનાશકમ્ ।
વારિતોઽભૂદ્વિરિઞ્ચેન યજ્ઞઃ શતતમઃ પૃથોઃ ॥ ૩૩॥

પ્રભુણા પરિહર્તવ્યો દ્વેષ આત્મીયયોર્મિથઃ ।
અનુશાસ્ય પૃથું ચક્રે શચીપતિસખં હરિઃ ॥ ૩૪॥

નિઃશેષં કથયેત્પૃષ્ટં ભક્ત્યા સંપ્રાર્થિતઃ સતા ।
પૃથું સનત્કુમારો હિ ક્ષેમોપાયં ભવેઽબ્રવીત્ ॥ ૩૫॥

અનુગમ્યઃ પતિઃ પત્ન્યા શ્રીમાન્નિઃસ્વો મૃતોઽપિ વા ।
અર્ચિર્બભૂવ દેવીભિઃ સંસ્તુતાનુગતા પૃથુમ્ ॥ ૩૬॥

સજ્જનસ્ય હિતોપાયં કૃપાલુઃ કથયેત્સ્વયમ્ ।
હરઃ પ્રચેતસો બર્હિષ્મદાખ્યં ચાહ નારદઃ ॥ ૩૭॥

બહુવ્યાપારસક્તેન કાલવેગો ન બુધ્યતે ।
સક્તઃ પ્રિયારતૌ કાલં બુબુધે ન પુરઞ્જનઃ ॥ ૩૮॥

સ્વોદિતાસ્વીકૃતો દુષ્ટા દુરુક્તિં શ્રાવયન્તિ હિ ।
સ્વયાજ્ઞાવિમુખં મૂઢા નારદં દુર્ભગાશપત્ ॥ ૩૯॥

કુટુમ્બી દુર્બલો હ્યન્તે બહૂન્ ક્લેશાનવાપ્નુયાત્ ।
તાપં પુરઞ્જનઃ પ્રાપ ગન્ધર્વાદિભિરર્દિતઃ ॥ ૪૦॥

ન હિંસ્યાઃ પ્રાણિનઃ કાર્યા વિષયાતિરતિર્ન ચ ।
નિરયે પશુભિશ્છિન્નો વૈદર્ભ્યાસીત્પુરઞ્જનઃ ॥ ૪૧॥

સંપદ્યેવ જનઃ સર્વો હિતકૃન્મિત્રમાપદિ ।
શોકં નાશિતવાન્ પૂર્વો વૈદર્ભ્યા બ્રાહ્મણઃ સખા ॥ ૪૨॥

પ્રીણયેદતિયત્નેન મહાન્તં નિખિલાર્થદમ્ ।

હરિપ્રીતિકૃતઃ પ્રાપુઃ સર્વાઃ સિદ્ધીઃ પ્રચેતસઃ ॥ ૪૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સ્કન્ધોઽગાદ્ધિ ચતુર્ગુણૈશ્ચ દશભિઃ શ્લોકૈશ્ચતુર્થો લસન્ ॥ ૪૪॥

ઇતિ શ્રીસુનીતિભાગવતે ચતુર્થઃ સ્કન્ધઃ સમાપ્તઃ ॥

---

પઞ્ચમઃ સ્કન્ધઃ ।

સામ્રાજ્યં સમગાત્પ્રિયવ્રતનૃપશ્ચાગ્નીધ્રરાણ્નાભિરાટ્
યત્પાદાબ્જરતઃ સ્વયં ચ ઋષભો ધર્માનથાદર્શયત્ ।
યદ્ભક્તો ભરતો ગયશ્ચ સુયશા યઃ સર્વલોકસ્થિતૈઃ
પૂજ્યો યદ્વિમુખાઃ પતન્તિ નરકે કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

સદ્ધર્મે સુમતેર્યયાતિનૃપતેરારાધિતશ્રીપતેઃ
સત્યે શૈલપતેર્જયે રતિપતેઃ સાક્ષાચ્ચ ગૌરીપતેઃ ।
દાનેઽઙ્ગાધિપતે રિપૌ પિતૃપતેર્વાણ્યા ચ વાચસ્પતેઃ
શ્રીમદ્વ્યાસયતે દયાસ્તુ મયિ તે પૂર્ણા ક્ષમાયાં ક્ષિતેઃ ॥ ૨॥

વર્ણિતં પઞ્ચમે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

નાશ્રયેદ્ધર્મમન્યસ્ય વિહાયોચિતમાત્મનઃ ।
પ્રિયવ્રતસ્ય સંન્યાસં બ્રહ્માઽઽગત્ય ન્યવારયત્ ॥ ૪॥

કાર્યમત્યદ્ભુતં કર્મ સ્વપ્રભાવપ્રકાશકમ્ ।
ચક્રે પ્રિયવ્રતઃ સપ્તસમુદ્રંશ્ચક્રનેમિભિઃ ॥ ૫॥

પ્રયસ્યેન્ન બુધઃ સત્સુ પરેષ્વાત્માર્થકારિષુ ।
ભૂમિં વિભજ્ય પુત્રેભ્યઃ સંન્યાસ્યાસીત્પ્રિયવ્રતઃ ॥ ૬॥

યોગિનોઽપિ વિમોહઃ સ્યાત્કામિનીમુખદર્શને ।
સંપ્રાર્થ્ય ભેજ આગ્નીધ્રઃ પૂર્વચિત્તિં વિમૂઢધીઃ ॥ ૭॥

કામી દેહં વિનાશ્યાપિ લબ્ધુમિચ્છતિ સુન્દરીમ્ ।
અયજદ્ધરિમાગ્નીધ્રઃ પ્રિયાસાલોક્યસિદ્ધયે ॥ ૮॥

શ્રદ્ધાવાન્ શુદ્ધભાવેન કર્મ સ્વોચિતમાચરેત્ ।
મુકુન્દો યજતો નાભેઃ પ્રસન્નઃ પુત્રતામગાત્ ॥ ૯॥

અદાતુઃ સ્પર્ધયા સ્વેષ્ટં ચેચ્છેત્તત્સાધયેત્સ્વયમ્ ।
સ્વવર્ષં ઋષભોઽવૃષ્ટાવભ્યવર્ષીત્સ્વશક્તિતઃ ॥ ૧૦॥

શિક્ષણયાઃ સુતાઃ પિત્રા સ્વયં સંશિક્ષિતા અપિ ।
અનુશિષ્ટાન્ સ્વતનયાનૃષભઃ સમશિક્ષયત્ ॥ ૧૧॥

આચરેદુત્તમાન્ ધાર્માન્ શિક્ષયન્ સજ્જનાન્ મહાન્ ।
ઋષભો મુનિશિક્ષાર્થમવધૂત ઇવાચરત્ ॥ ૧૨॥

મહાત્યુલ્લઙ્ઘિતેઽપ્યલ્પમલઙ્ઘ્યં દૈવતો ભવેત્ ।
ભરતસ્ય વિરક્તસ્ય દુસ્ત્યજોઽભૂન્મૃગાર્ભકઃ ॥ ૧૩॥

પુનઃ કુર્યાન્ન દુષ્કર્મ ફલે જ્ઞાતેઽનુતાપવાન્ ।
અત્યજદ્ભરતોઽસઙ્ગઃ સઙ્ગાપ્તં મૃગવિગ્રહમ્ ॥ ૧૪॥

વ્યર્થાયાસનિવૃત્યર્થં સ્વસ્યાજ્ઞત્વં પ્રકાશયેત્ ।
વિપ્રજન્માત્મનો જાડ્યં ભરતઃ સમદર્શયત્ ॥ ૧૫॥

કૃતસાધુવધોદ્યોગઃ સ્વયમેવ વિનશ્યતિ ।
હન્તુકામા દ્વિજં ભદ્રકાલ્યા હિ વૃષલા હતાઃ ॥ ૧૬॥

અપરાધમપિ શ્રેષ્ઠં સહેતાજ્ઞાનિના કૃતમ્ ।
ઉવાહ શિબિકાં રાજ્ઞો ગૃહીતો ભરતો દ્વિજઃ ॥ ૧૭॥

પરસ્વરૂપં વિજ્ઞેયં વચનાદેવ નાકૃતેઃ ।
સ્વભર્ત્સિતં દ્વિજં જાનન્નનામોક્તે રહૂગણઃ ॥ ૧૮॥

વિધાયાનુગ્રહં વિદ્વાનજ્ઞં સમ્યક્પ્રબોધયત્ ।
વિપ્રો રહૂગણં ભૂપં બોધયામાસ સૂક્તિભિઃ ॥ ૧૯॥

સત્સેવાભક્તિધર્મશ્રીજ્ઞાનોપશમભાગ્ભવેત્ ।
ગયો નામ મહારાજઃ સર્વેષ્વપ્રતિમોઽભવત્ ॥ ૨૦॥

પ્રાપ્યં બહુભિરાકારૈર્બહુસ્થાનેષુ પૂજનમ્ ।
નાનાકૃતિર્હરિઃ સર્વૈર્નાનાસ્થાનેષુ પૂજ્યતે ॥ ૨૧॥

ગુર્વપ્યત્યન્તમન્યસ્ય નૈવ સ્યાન્મહતો ગુરુ ।
શેષસ્ય શિરસિ ક્ષોણીમણ્ડલં સર્ષપાયતે ॥ ૨૨॥

સર્વભૂતસુહૃદ્દાન્તઃ સદાચારી સદા ભવેત્ ।
નરકેષુ યમઃ પાપાન્નિપાતયતિ નિર્દયઃ ॥ ૨૩॥

લક્શ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કુટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસન્ દ્વિગુણિતૈઃ સ્કન્ધોઽગમત્પઞ્ચમઃ ॥ ૨૪॥

ઇતિ શ્રીસુનીતિભાગવતે પઞ્ચમઃ સ્કન્ધઃ સમાપ્તઃ ॥

---

ષષ્ઠઃ સ્કન્ધઃ ।

યત્સેવાકૃદજામિલો જયમગાદ્ધર્યશ્વમુખ્યાસ્તથા
શ્રીનારાયણવર્મ વજ્ર્યધિગતઃ સદ્વિશ્વરૂપોદિતમ્ ।
વૃત્રં સ ન્યવધીત્સુસિદ્ધિમગમદ્રાટ્ ચિત્રકેતુર્દિતે-
ર્ગર્ભં પ્રાણહરં ચકર્ત મઘવા કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

શ્રીશાર્ચાધિકૃતેઃ કૃતાત્યુપકૃતેરાચીર્ણસત્સત્કૃતેઃ
સંશુદ્ધપ્રકૃતેરચિત્તવિકૃતેઃ પાદૌ સુસૌમ્યાકૃતેઃ
શ્રીજીવોત્તમસંયમિપ્રવર તે નૌમીપ્સિતાપ્તેઃ કૃતે ॥ ૨॥

સ્કન્ધેઽથ વર્ણિતઃ ષષ્ઠે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

સુખાવહં વરં વસ્તુ કથઞ્ચિદપિ સેવિતમ્ ।
નારાયણેતિ ચાહૂય મુક્તઃ પુત્રમજામિલઃ ॥ ૪॥

સંગત્યા ક્ષીયતે સાધુઃ સંગત્યૈવ પ્રજાયતે ।
શૂદ્રસ્યાજામિલઃ પાપો દૂતાનાં સઙ્ગતઃ સુધીઃ ॥ ૫॥

માનયેન્મહતો વાક્યં ભદ્રાર્થી તોષયેત્પ્રભુમ્ ।
કન્યાં પ્રચેતસઃ પ્રાપ્તા દક્ષોઽપ્યપેપ્સિતં હરેઃ ॥ ૬॥

સંગતિર્યાદૃશાં જાતા યસ્ય સઃ સ્યાત્તુ તાદૃશઃ ।
હાર્યશ્વાઃ સન્તતાવિચ્છાં જહુર્નારદસઙ્ગતેઃ ॥ ૭॥

તિતિક્ષોરપિ કોપઃ સ્યાત્પુનરપ્યપ્રિયે કૃતે ।
ભિક્ષૂન્ શ્રુત્વાશપદ્દક્ષો નારદં શબલાશ્વકાન્ ॥ ૮॥

અવમાનકરં શ્રેષ્ઠમપિ ધીરઃ પરિત્યજેત્ ।
અદૃશ્યોઽભૂદ્ગુરુર્મત્તં વિમુચ્યેન્દ્રમનુત્થિતમ્ ॥ ૯॥

વયસોનમપિ પ્રાજ્ઞં દ્વિજં સેવેત સમ્પદે ।
વિશ્વરૂપં વિરિઞ્ચોક્તા ભેજુર્દૈત્યાર્દિતાઃ સુરાઃ ॥ ૧૦॥

ભવેત્સમ્યગ્ધૃતા વિદ્યા સર્વત્ર વિજયાવહા ।
જિગાય દિતિજાનિન્દ્રઃ શ્રીનારાયણવર્મધૃત્ ॥ ૧૧॥

દુષ્ટસ્નેહો ન કર્તવ્યો ન કાર્યં મિત્રવઞ્ચનમ્ ।
હત ઇન્દ્રેણ દૈત્યેભ્યો વિશ્વરૂપો દદદ્ધવિઃ ॥ ૧૨॥

ન સાધ્વસાધુ વા કર્મ મહાન્તમપિ મુઞ્ચતિ ।
અબ્દાન્તે બ્રહ્મહત્યાદ્યં શક્રો ભ્વાદૌ વિભક્તવાન્ ॥ ૧૩॥

શ‍ૃણુયાદ્વિજયોપાયમજ્ઞોઽપિ પ્રાજ્ઞભાષિતમ્ ।
શુશ્રુવુર્વિષ્ણુના પ્રોક્તં વૃત્રાસુરજિતાઃ સુરાઃ ॥ ૧૪॥

પરોપકૃતયે ધીરઃ સ્વશરીરમપિ ત્યજેત્ ।
દધીચિરમરૈઃ સેન્દ્રૈર્યાચિતઃ સ્વાતનું જહૌ ॥ ૧૫॥

મુખરોઽવસરે યુદ્ધે શૂરઃ સ્યાદ્ધીર આપદિ ।
વૃત્રો ધૈર્યાદિના તુષ્ટૈઃ પૂજિતોઽભૂત્સુરાસુરૈઃ ॥ ૧૬॥

દુષ્પક્ષપાતી હન્તવ્યો વિદ્વાનપ્યતિયત્નતઃ ।
કુક્ષેર્નિષ્ક્રમ્ય વૃત્રસ્ય વજ્રેણેન્દ્રોઽહરચ્છિરઃ ॥ ૧૭॥

ક્ષીયન્તે દુસ્તરા દોષાઃ કૃતે મહતિ કર્મણિ ।
હયમેધકૃતો વૃત્રહત્યા નષ્ટા શચીપતેઃ ॥ ૧૮॥

પૂર્વમેવ વદેદ્ભાવિ બુદ્ધિમાન્ સાધ્વસાધુ ચ ।
પ્રોચે હર્ષાર્તિદં પુત્રમઙ્ગિરાશ્ચિત્રકેતવે ॥ ૧૯॥

અમાન્યમપ્યતિક્ષુદ્રં નાવમન્યેત કઞ્ચન ।
કૃતદ્યુતેઃ શિશુઃ સ્ત્રીભિર્ભર્તુર્દ્વેષાદ્ધિ મારિતઃ ॥ ૨૦॥

ક્ષિપ્રં ફલતિ સદ્વિદ્યા પ્રસન્નગુરુણોદિતા ।
નારદોદિતયા સિદ્ધશ્ચિત્રકેતુર્હિ વિદ્યયા ॥ ૨૧॥

આલમ્બ્ય ધૃષ્ટતાં શ્રેષ્ઠં પરં નોપહસેત્સુધીઃ ।

ચિત્રકેતુર્હસન્ રુદ્રં દુર્યોનિં શિવયાઽઽપિતઃ ॥ ૨૨॥

નિહન્યાદેવ સંલબ્ધચ્છિદ્રઃ પ્રાણહરં રિપુમ્ ।
ગર્ભઃ શક્રેણ સન્ધ્યાયાં સુપ્તાયા દારિતો દિતેઃ ॥ ૨૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસન્ દ્વિગુણિતૈઃ સ્કન્ધશ્ચ ષષ્ઠોઽગમત્ ॥ ૨૪॥

ઇતિ શ્રીસુનીતભાગવતે ષષ્ઠઃ સ્કન્ધઃ સમાપ્તઃ ॥

---

સપ્તમઃ સ્કન્ધઃ ।

પ્રાપ્તબ્રહ્મવરાદ્ધિરણ્યકશિપોર્ભીતામરભ્યોઽભયં
યોઽદાત્તત્તનયસ્ય દુઃખહૃદભૂદ્ભૂત્વા તમિષ્ટપ્રદઃ ।
ગૌઃ પીતામૃતસદ્રસસ્ત્રિપુરહૃદ્રુદ્રપ્રિયો યોઽભવ-
ચ્છૂદ્રોઽયં શ્રિત આસ નારદમુનિઃ કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

શ્રીનાથાઙ્ઘ્રિગતેઃ કૃતાજિતનુતેરત્યક્તમધ્વસ્મૃતે-
ર્ગોકર્ણાવસતેઃ સુનિર્મલમતેરુત્સૃષ્ટદુઃસઙ્ગતેઃ ।
સદ્ભક્તેઃ પ્રથિતે મતે દશમતેર્દેવાદિભિઃ સેવિતે
દાસ્યં શ્રીરઘુચન્દ્રમસ્કરિયતેઃ સ્યાન્મેઽભિવન્દ્યસ્થિતેઃ ॥ ૨॥

વર્ણિતં સપ્તમે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

બાલં મત્વાતિસામર્થ્યભાજં નૈવાવમાનયેત્ ।
સનન્દનાદિભી રુદ્ધૈઃ શપ્તશ્ચ વિજયો જયઃ ॥ ૪॥

પ્રાપ્તેઽપ્યનુભવે દુષ્ટઃ પાપં કર્મ કરોતિ હિ ।
હિરણ્યકશિપુર્ધર્મવિઘ્નં ચક્રે હતાનુજઃ ॥ ૫॥

ગતશોકો ન કર્તવ્યો વિચિન્ત્યં કાર્યમુત્તરમ્ ।
વ્યાધોઽવિધ્યત્કુલિઙ્ગં હિ શોચન્તં દયિતાં ચિરમ્ ॥ ૬॥

માનયેદ્યુક્તિભિર્યુક્તં શિશોરપિ વચો બુધઃ ।
સુયજ્ઞજ્ઞાતયોઽગૃહ્ણન્ બાલરૂપિયમોદિતમ્ ॥ ૭॥

મતિર્ન દુષ્ટસંસર્ગાન્નિઃશેષા ક્ષીયતે સતઃ ।
દિત્યા અકથયત્તત્ત્વં હિરણ્યકશિપુઃ પરમ્ ॥ ૮॥

નિવેદનીયા પ્રભવે સ્વોપદ્રવસમાગતિઃ ।
બ્રહ્મણેઽવર્ણયન્ દેવા દિતિજેન્દ્રતપોઽર્દિતાઃ ॥ ૯॥

અદેયમપિ દાતવ્યં મહત્કાર્યં પ્રપશ્યતા ।
દૈત્યેન્દ્રાય વરાનુગ્રાન્ પ્રદદૌ ચતુરાનનઃ ॥ ૧૦॥

સમ્પદ્દુરાત્મનો લોકસન્તાપાયૈવ જાયતે ।
હિરણ્યકશિપુર્લબ્ધવરઃ સાર્વાનતાપયત્ ॥ ૧૧॥

સર્વેભ્યોઽપ્યભયં દેયં વિશ્સેષાચ્છરણાર્થિને ।
દેવેભ્યો દૈત્યભીતેભ્યો દત્તવાનભયં હરિઃ ॥ ૧૨॥

પથ્યમેવાપ્રિયમપિ પારૈઃ પૃષ્ટો વદેત્સુધીઃ ।
પિત્રા પૃષ્ટોઽવદત્સાધુ પ્રહ્લાદો હરિસેવનમ્ ॥ ૧૩॥

ઉપદ્રવા ન બાધન્તે કૃતે  મહત આશ્રયે ।
પ્રહ્લાદે કારિતં પિત્રા નિષ્ફલં તાડનાદ્યભૂત્ ॥ ૧૪॥

વિસ્મૃતા ન ભવેદ્વિદ્યા ગુર્વનુગ્રહશાલિનઃ ।
ન પ્રહ્લાદો વિસસ્માર સત્તત્ત્વં નારદોદિતમ્ ॥ ૧૫॥

પરોક્તિદૂષિતધિયો વિદ્વાનજ્ઞાન્ પ્રબોધયેત્ ।
સત્તત્ત્વં દૈત્યપુત્રેભ્યઃ પ્રહ્લાદઃ સંન્યવેદયત્ ॥ ૧૬॥

અત્યુત્કટં સુદુષ્કર્મ ન કુર્યાદકુતોભયઃ ।
સ્તમ્ભોત્થેન નૃસિંહેન હિર્ણ્યકશિપુર્હતઃ ॥ ૧૭॥

કોપં વિહાય કુર્વન્તિ બાલકે પ્રીતિમુત્તમાઃ ।
હિત્વા બ્રહ્માદિકાન્ પ્રીતઃ પ્રહ્લાદસ્યાભવદ્ધરિઃ ॥ ૧૮॥

તાતમુદ્ધરતે દોષાત્સુપુત્રઃ સ્વેન તેજસા ।
પ્રહ્લાદઃ પિતરં પૂતં નૃસિંહવરતો વ્યધાત્ ॥ ૧૯॥

પૂર્વં નાશ્યમુપાયેન બલં શત્રોર્વધેચ્છુના ।
વિષ્ણુર્મયસ્ય ગૌર્ભૂત્વા સિદ્ધામૃતરસં પપૌ ॥ ૨૦॥

અન્યતોઽપિ બલં પ્રાપ્ય શત્રૂનુન્મૂલયેત્સુધીઃ ।
દદાહ ત્રિપુરં ગુપ્તો ભગવત્તેજસા શિવઃ ॥ ૨૧॥

અસદ્ગ્રહપરશ્ચ સ્યાદ્દૈવલબ્ધપ્રતોષવાન્ ।
મુનિર્મધુવ્રતાગ્ર્યાહ્યોઃ શિક્ષયારમતેદૃશઃ ॥ ૨૨॥

વિરોધાન્મહતાં નષ્ટાધિકા સ્યાચ્છ્રીરનુગ્રહાત્ ।
પ્રાપ નારદતાં પ્રાપ્તઃ શૂદ્રતામુપબર્હણઃ ॥ ૨૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસન્ દ્વિગુણિતૈઃ સ્કન્ધોઽગમત્ સપ્તમઃ ॥ ૨૪॥

ઇતિ શ્રીસુનીતિભગવતે સપ્તમઃ સ્કન્ધઃ સમાપ્તઃ ॥

---

અષ્ટમઃ સ્કન્ધઃ ।

યઃ સ્વાયમ્ભુવસન્મનોશ્ચ જગતઃ સંરક્ષકો હસ્તિનો
દધ્રે મંદરભૂભૃતં મથનકૃદ્વાર્ધેઃ સુધાં યો દદૌ ।
દેવેભ્યોઽથ વિમોહયન્ દિતિસુતાન્ સન્તાપયન્ વજ્રિણે
સ્વાર્ગં બદ્ધબલિઃ શ્રુતિશ્ચ વિધયે કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

લક્ષ્મીપ્રાણપતેર્જયે દિનપતેર્દ્યુત્યાં મતૌ ગીર્પતેઃ
કીર્તૌ દેવપતેર્ધૃતૌ ગિરિપતેઃ શાન્તૌ ચ તારાપતેઃ ।
વ્યાખ્યાનેઽહિપતેર્બલેઽનિલપતેર્ગામ્ભીર્યકેઽપામ્પતે-
ર્વક્તું શ્રીરઘુચન્દ્રસદ્ગુરુયતેઃ કોઽલં ગુણાન્ સત્પતેઃ ॥ ૨॥

અષ્ટમે વાર્ણિતં સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

શ્રેષ્ઠારાધનસક્તસ્ય નૈવ કુર્યાદુપદ્રવમ્ ।
યજ્ઞેનાપ્તા હતા દૈત્યા જગ્ધું સ્વાયમ્ભુવં મનુમ્ ॥ ૪॥

અસત્યવાદી દુઃશીલો ભૂતદ્રોહી ચ નો ભવેત્ ।
એવંવિધાશ્ચ યક્ષાદ્યા સત્યસેનેન ઘાતિતાઃ ॥ ૫॥

ઉપાયાન્તરહીનસ્તુ કાર્યં સ્તુત્યૈવ સાધયેત્ ।
ગાજેન્દ્ર શ્રીહરિં સ્તુત્વા વિમુક્તો નક્રવક્ત્રતઃ ॥ ૬॥

ગુરું સમ્પાદયેત્કાર્યં સન્ધિં કૃત્વાપિ શત્રુભિઃ ।

અમૃતાર્થે હરિપ્રોક્તા દેવા દૈત્યૈઃ સહોદ્યતાઃ ॥ ૭॥

ઉદ્યોગે ન મહાકાર્યે કાર્યઃ સ્વાનુચિતે બલાત્ ।
દેવદૈત્યોદ્ધૃતોઽદ્રિસ્તાન્ મન્દરોઽચૂર્ણયત્પતન્ ॥ ૮॥

યત્રોચિતો ય આકારો બિભૃયાત્તત્ર તં બુધઃ ।
કૂર્મરૂપેણ ગોવિન્દ ઉદ્ધાર હિ મન્દરમ્ ॥ ૯॥

નૈવ પ્રાર્થ્યં પ્રતિષ્ઠાયૈ વરં વસ્તુ વિનાશકૃત્ ।
શ્રાન્તા અતિતરાં દૈત્યા ગૃહીત્વા વાસુકેર્મુખમ્ ॥ ૧૦॥

પરદ્વારા ન સિદ્ધં ચેત્સ્વયં કાર્યં પ્રસાધયેત્ ।
મમન્થ સર્વમથિતમજિતોઽબ્ધિં સુધાઽઽપ્તયે ॥ ૧૧॥

લોકોપકૃતયે પ્રાપ્તો નૈવ ભઙ્ગોઽપિ દૂષણમ્ ।
રુદ્રસ્ય વિષપાનોત્થો ભૂષણં ગલકાલિમા ॥ ૧૨॥

પ્રાર્થયન્તમપિ ત્યક્ત્વા દોષિણં ગુણિનં ભજેત્ ।
લક્ષ્મી સુરાસુરાન્ હિત્વા વવ્રે નારાયણં પતિમ્ ॥ ૧૩॥

પરેષાં સત્યનાશાય સ્વાં શક્તિં દર્શયેત્ક્વચિત્ ।
ધન્વન્તરિઃ સમર્થોઽપિ દૈત્યેભ્યોઽમૃતમત્યજત્ ॥ ૧૪॥

ત્યક્તસત્યૈર્બલાન્નીતં પ્રસાધ્યં વસ્તુ કૂટતઃ ।
સ્ત્રીરૂપો મોહયન્ દૈત્યાન્ દેવેભ્યોઽદાત્સુધાં હરિઃ ॥ ૧૫॥

સ્વાયોગ્યં પ્રાપ્નુયાન્નૈવ કપટેન સમન્વિતઃ ।
અમૃતં પિબતો રાહોશ્ચકર્ત હિ શિરોઽચ્યુતઃ ॥ ૧૬॥

મહતાં દર્શનેનૈવ માયાજાલં વિનશ્યતિ ।
વિષ્ણુર્દર્શનતો નષ્ટા માયા દૈત્યવિનિર્મિતા ॥ ૧૭॥

ક્ષીણં પૂર્વગતં પશ્યન્ કાર્યાર્થં ન સ્વયં વ્રજેત્ ।
જમ્ભાસુરો હતો યુધ્યન્ વજ્રિણા બલઘાતિના ॥ ૧૮॥

ક્વચિત્ક્ષુદ્રેણ યત્સિધ્યેન્મહતા તન્ન સિધ્યતિ ।
ફેનેનેન્દ્રોઽહરદ્વજ્રાચ્છેદ્યં હિ નમુચેઃ શિરઃ ॥ ૧૯॥

પ્રાપ્તાર્થઃ કલહં મુઞ્ચેન્મધ્યસ્થેન નિવારિતઃ ।
વિહાય સમરં દેવા નારદોક્તા દિવં યયુઃ ॥ ૨૦॥

દુસ્તરા માયિનો માયા નિઃસઙ્ગૈઃ પણ્ડિતૈરપિ ।
યોષિદ્રૂપં હરેઃ પશ્યન્માયયા મોહિતો હરઃ ॥ ૨૧॥

સર્વસ્વં ચ સમર્પ્યાપિ પ્રીણયેત્પ્રાણરક્ષકમ્ ।
બલિરિન્દ્રહતઃ સર્વં શુક્રાયોજ્જીવિતો દદૌ ॥ ૨૨॥

સમર્થોઽપિ ભવેત્ત્રસ્તઃ શત્રોર્વિદ્યાવદાશ્રયાત્ ।
શુક્રગુપ્તાદ્બલેર્ભીતા દેવસ્ત્યક્ત્વા દિવં યયુઃ ॥ ૨૩॥

સ્વાત્માનમપિ સંદદ્યાદત્યન્તારાધિતઃ પુમાન્ ।
આત્માનમેવ તનયં પ્રીતો દિત્યૈ હરિર્દદૌ ॥ ૨૪॥

અવાપ્નોતિ ફલં સદ્યો મહતો વિપ્રિયં બ્રુવન્ ।
આપ્તવાન્ શુક્રતઃ શાપં બલિઃ સ્વશ્રીક્ષયપ્રદમ્ ॥ ૨૫॥

પ્રકાશનીયં વિદ્વદ્ભિઃ સ્વરૂપં કાર્યસિદ્ધયે ।
વામનો બલયે વ્યાપ્તં સ્વરૂપં સમદર્શયત્ ॥ ૨૬॥

માનનીયો મહાન્ દૈવાત્સંપ્રાપ્તઃ સ્વગૃહાન્તિકમ્ ।
ત્રિવિક્રમપદં વ્યાપ્તં દ્વિતીયં વિધિરર્ચયત્ ॥ ૨૭॥

કાર્યે ગતે તુ કલહં નૈવ કુર્યાદ્રુષાન્વિતઃ ।
દૈત્યા હન્તું હરિં પ્રાપ્તાસ્તાડિતા વિષ્ણુપાર્ષદૈઃ ॥ ૨૮॥

અનુમન્યેત સભક્ત્યા પ્રભુણાવિપ્રિયં કૃતમ્ ।
પ્રહ્લાદો વામનહૃતામનુમેને બલેઃ શ્રિયમ્ ॥ ૨૯॥

દીનોઽપિ ભ્રંશિતઃ સ્થાનાન્નિબદ્ધો ન ત્યજેદ્વ્રતમ્ ।
બલેઃ સત્યવ્રતસ્ત્વાસીદ્વામનો દ્વારપાલકઃ ॥ ૩૦॥

ભિક્ષિત્વાપીપ્સિતં દેયં વયઃશ્રેષ્ઠાય બન્ધવે ।
સ્વર્ગં દદૌ મહેન્દ્રાય યાચિત્વા વામનો બલેઃ ॥ ૩૧॥

આપ્તોક્તં ભાવયન્ ભાવિ વિદધ્યાત્તત્ર તૂચિતમ્ ।
સત્યવ્રતો હિ મત્સ્યોક્તિં શૃણ્વન્નાવિ સ્થિતોઽભવત્ ॥ ૩૨॥

નીચં રૂપમપિ ગ્રાહ્યં ભવેદ્યેન પ્રયોજનમ્ ।
હરિર્મત્સ્યો હયગ્રીવં હત્વા વેદાન્ વિધેરદાત્ ॥ ૩૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।

રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સચ્છ્લોકૈર્દશભિર્લસંસ્ત્રિગુણિતૈઃ સ્કન્ધઃ સમાપ્તોઽષ્ટમઃ ॥ ૩૪॥

ઇતિ શ્રીસુનીતિભાગવતે અષ્ટમઃ સ્કન્ધઃ સમાપ્તઃ ॥

---

નવમઃ સ્કન્ધઃ ।

શ્રીનાભાગસદમ્બરીષલૃપતૌ ચેક્ષ્વાકુમાન્ધાતૃરાટ્-
પૂર્વા યદ્ભજનાન્મહત્સગરરાણ્મુખ્યાઃ શુભં લેભિરે ।
ખટ્વાઙ્ગો રઘુપઃ સ્વયં મિનિવિધૂગાધિઃ સ્વયં ભાર્ગવો
યોઽલર્કશ્ચ યયાતિપૂરુભરતાઃ કૃષ્ણઃ સ નો રક્ષતાત્ ॥૧॥

શ્રીરોદાતિહિતેશશૈલમહિતે શક્રદ્વિપેન્દ્રોદ્ધતે
ગઙ્ગાસઙ્ગસિતેવ સર્વબુધિતે વિદ્વદ્વરૈર્વર્ણિતે ।
લોકે કલ્પલતેવ દત્તદયિતે સચ્ચન્દ્રિકાવ્યાયતે
ત્વં હે સાગરવેઙ્કટેશબુધસત્કીર્તે પુનીહ્યેવ નઃ ॥૨॥

વર્ણિતં નવમે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

ગુરુમારાધયેત્કાર્યે મહતિ પ્રત્યુપસ્થિતે ।
ગુરુપ્રસાદતઃ પુંસ્ત્વં પ્રાપેલા હિ મનોઃ સુતા ॥ ૪॥

સ્વરૂપહાનિકૃદ્દોષો જ્ઞાનાદ્વાજ્ઞાનતઃ કૃતઃ ।
પૃષધ્રો હતગુઃ પ્રાપ શૂદ્રતાં ગુરુશાપતઃ ॥ ૫॥

ઉત્તમોઽપ્યલ્પકર્યાર્થમાચારેદ્દાસવત્ક્રિયામ્ ।
મરુતઃ પરિવેષ્ટારો મરુત્તસ્ય મખેઽભવન્ ॥ ૬॥

વિદ્યયૈવ હિ સંસિધ્યેત્સ્ત્રીપુત્રાદીષ્ટસાધનમ્ ।
પ્રદાય વિશ્રવા વિદ્યાં તૃણબિન્દોઃ સુતાં હ્યગાત્ ॥ ૭॥

સ્ત્રીણા હિ સત્પતિપ્રાપ્તાવદૃષ્ટં કારણં ભવેત્ ।
સુકન્યા ચ્યવનં ભેજે યુવાનં જરઠં પુરા ॥ ૮॥

કાલં નોલ્લઙ્ઘયેદિષ્ટે મહતઃ સંમતીચ્છયા ।
રેવત્યા હિ વરા નાપ્તાઃ કૃતા હૃદિ કકુદ્મિના ॥ ૯॥

અર્જયેદ્દ્રવિણં સત્યવાદ્યનિચ્છન્ પરાર્જિતમ્ ।

ઋતવાદી હિ નાભાગો બહુલં ધનમાપ્તવાન્ ॥ ૧૦॥

પીડયેદ્વૈષ્ણવાન્નૈવ મહાનપિ તપસ્વ્યપિ ।
અમ્બરીષાર્તિકૃત્પ્રાપ્તો દુર્વાસા અસમાં દશામ્ ॥ ૧૧॥

નોલ્લઙ્ઘનીયઃ સકલૈરપિ પ્રાણાત્યયે વિધિઃ ।
ઇક્ષ્વાકુણા વિકુક્ષ્યાખ્યઃ સુતસ્ત્યક્તઃ શશાદનઃ ॥ ૧૨॥

સ્વકીયકાર્યસમ્પ્રાપ્ત્યૈ લભેત લઘુતાં સુધીઃ ।
શક્રો ઘાતયતો દૈત્યાન્ કકુત્સ્થસ્યાસ વાહનમ્ ॥ ૧૩॥

વધે શક્તોઽપિ નો કુર્યાદ્વિગ્રહં ક્રૂરવૈરિણા ।
ધુન્ધુમારસુતા દગ્ધા ધુન્ધુનાપિ વિનશ્યતા ॥ ૧૪॥

લોકસ્ય નૈવ બુદ્ધ્યાદિબલં દૈવબલં બલમ્ ।
માન્ધાતા નિર્ગતઃ કુક્ષેર્યુવનાશ્વશ્ચ નો મૃતઃ ॥ ૧૫॥

સર્વથાપિ ત્યજેદેવ મુમુક્ષુઃ સઙ્ગમન્યતઃ ।
પત્સ્યસઙ્ગાત્પ્રિયાપુત્રબન્ધનં પ્રાપ સૌભરિઃ ॥ ૧૬॥

સ્વયશો ગાયતઃ પુંસઃ સાધ્વસં ધ્વંસયેદ્બુધઃ ।
ગન્ધર્વાન્તસ્મૃતેઃ સર્પાત્પુરુકુત્સોઽહરદ્ભયમ્ ॥ ૧૭॥

પરાભૂતસ્તુ મહતા મહાન્તં પરમાશ્રયેત્ ।
ગુરુશપ્તસ્ત્રિશઙ્કુઃ સ્વર્ગતઃ કૌશિકતેજસા ॥ ૧૮॥

અશુભં વારયેત્પ્રાપ્તં કાલસ્યાતિવિલઙ્ઘનાત્ ।
હરિશ્ચન્દ્રસુતસ્ત્રાતો વરુણાદ્રોહિતો ન કિમ્ ॥ ૧૯॥

સ્વદુષ્કૃતોદયે સંપત્ક્ષણમાત્રાદ્વિનશ્યતિ ।
બાહુકોઽરિહૃતશ્રીકો મમાર વિપિને નૃપઃ ॥ ૨૦॥

નાશહેતૌ કૃતેઽપ્યન્યૈર્ભવ્યં નિયમતો ભવેત્ ।
સપત્નીદત્તવિષતઃ સહૈવ સગરોઽજનિ ॥ ૨૧॥

અતિક્રમસ્તુ મહતો ન કાર્યો બહુભિર્જનૈઃ ।
સાગરાઃ કપિલદ્રોહાન્મૃતાઃ ષષ્ટિસહસ્રિણઃ ॥ ૨૨॥

યત્નો દેહવ્યયેનાપિ કાર્યો બન્ધુશુભાપ્તયે ।
પ્રખ્યાતાવંશુમત્પૂર્વૌ ગઙ્ગાનયનતત્પરૌ ॥ ૨૩॥

દત્વા પરેષ્ટં કિમપિ લભેત સ્વપ્રિયં તતઃ ।
ઋતુપર્ણોઽક્ષહૃદયદોઽશ્વવિદ્યાં નલાદગાત્ ॥ ૨૪॥

યાદૃશં કર્મ કુરુતે તાદૃશં ફલમશ્નુતે ।
બ્રાહ્મણ્યા રતિહૃન્નૈવ કલ્માષાઙ્ઘ્રી રતિં યયૌ ॥ ૨૫॥

આયુષોઽપચયં જાનન્ કાર્યં પ્રાગેવ સાધયેત્ ।
મુહૂર્તમાયુર્જ્ઞાત્વા સ્વં ખટ્વાઙ્ગો બન્ધનં જહૌ ॥ ૨૬॥

માનનીયઃ પિતાવશ્યં સ્ત્રીવશોઽકુશલોઽપિ વા ।
રામો દશરથસ્યાજ્ઞાં સ્વીકૃત્ય પ્રયયૌ વનમ્ ॥ ૨૭॥

આત્માનં યત્નતો રક્ષન્નશ્યત્સ્વકુલમુદ્ધરેત્ ।
સૂર્યવંશં કલેરન્તે મરુઃ કિં નોદ્ધરિષ્યતિ ॥ ૨૮॥

પરઘાતકરો લોકે બૃહન્નપિ ન જીવતિ ।
વસિષ્ઠસ્તુ નિમિં શપ્ત્વા મૃતોઽભૂત્તસ્ય શાપતઃ ॥ ૨૯॥

દુર્જયા વિષયા પુંસા વિદુષાપિ વિવેકિના ।
ચન્દ્રો બૃહસ્પતેર્ભાર્યાં જહાર વિષયાતુરઃ ॥ ૩૦॥

વિશ્વાસો નૈવ કર્તવ્યો નારીષુ સ્વૈરવૃત્તિષુ ।
વિહાય પ્રયયૌ કાન્તાં પુરૂરવસમુર્વશી ॥ ૩૧॥

યત્નેન દુર્લભં દત્વા પ્રાપ્નુયાદ્વસ્તુ તાદૃશમ્ ।
લેભે સત્યવતીં ગાધેરૃચીકોઽશ્વસહસ્રદઃ ॥ ૩૨॥

દુર્લભં વસ્તુ મિત્રસ્ય લુબ્ધઃ સન્ન નયેદ્બલાત્ ।
જમદગ્નેર્હરન્ ધેનું કાર્તવીર્યો હતોઽર્જુનઃ ॥ ૩૩॥

અવિચાર્યૈવ કુર્વીત ત્વરયા વચનં પિતુઃ ।
માત્રા રામઃ સહ ભ્રાતૄન્ જમદગ્ન્યુદિતોઽવધીત્ ॥ ૩૪॥

ન હન્યાદ્દુર્બલો દૈવાચ્છિદ્રે પ્રાપ્તે મહાત્મનઃ ।
જમદગ્ન્યન્તકા નષ્ટા ન કિમર્જુનસૂનવઃ ॥ ૩૫॥

વિનશ્યતિ કુલં સર્વમેકસ્યૈવાપરાધતઃ ।
અર્જુનાત્મજદોષેણ ક્ષીણા ક્ષત્રિયસન્તતિઃ ॥ ૩૬॥

આત્મૈવોદ્ધારકઃ સ્વસ્ય પિતા માતા ન વાપરઃ ।
વિમુક્તઃ પિતૃવિક્રીતઃ શુનઃશેપઃ સુરાન્ સ્તુવન્ ॥ ૩૭॥

ભજેત સમ્પદં ભોગે દક્ષશ્ચિરતરં સ્થિરામ્ ।
અલર્કો બુભુજે પૃથ્વીં બહુવર્ષસહસ્રકમ્ ॥ ૩૮॥

સ્વવશે સ્થાપિતં દ્રવ્યં પ્રતિદદ્યાદ્રહોઽર્થિતઃ ।
ઇન્દ્રાયાપ્રતિયચ્છન્તઃ સ્વર્ગં નષ્ટા રજેઃ સુતાઃ ॥ ૩૯॥

નેચ્છેત્સુધીર્મહૈશ્વર્યમહઙ્કારમદપ્રદમ્ ।
નહુષેણ યતિર્દત્તં રાજ્યં ન જગૃહે યતઃ ॥ ૪૦॥

ગૃહ્ણીયાદનભિપ્રેતં સ્વાયોગ્યમપિ ચાર્થિતઃ ।
દેવયાનીમુદવહદ્યયાતિઃ શુક્રકન્યકામ્ ॥ ૪૧॥

ધર્મમપ્યાચરેન્નૈવ પ્રતિકૂલં મહાત્મનઃ ।
શર્મિષ્ઠાં રમયન્ ધર્માદ્યયાતિર્લબ્ધવાન્ જરામ્ ॥ ૪૨॥

યાચિતસ્તનયઃ પિત્રે પ્રાણાનપિ સમર્પયેત્ ।
અર્પિતસ્વવયાઃ પૂરુર્જાતો ભૂમણ્ડલાધિપઃ ॥ ૪૩॥

સ્વમનો રમતે યસ્મિન્નાચરેત્તન્મહામતિઃ ।
મનઃ પ્રવૃત્તેર્દુષ્યન્ત ઉપયેમે શકુન્તલામ્ ॥ ૪૪॥

કથઞ્ચિદપિ સત્પુત્રં લભેતાતિપ્રયત્નવાન્ ।
ભરતઃ પ્રાપ દેવેભ્યો ભરદ્વાજં સુતં યથા ॥ ૪૫॥

દદ્યાદેવાર્થિને કિઞ્ચિદપિ ધીમાનકિઞ્ચનઃ ।
રન્તિદેવો દદદ્ભોજ્યં ક્ષુધિતોઽપ્યાપ સદ્યશઃ ॥ ૪૬॥

યદ્વસ્તુ મહતાં યોગ્યં તેભ્યઃ પ્રાઙ્ ન લભેત તત્ ।
શન્તનોઃ પરિવેત્તુર્યદિન્દ્રો રાષ્ટ્રે વવર્ષ ન ॥ ૪૭॥

સ્વપુત્રાયૈવ શાન્તાય વિદ્યામુપદિશેદ્વરામ્ ।
વ્યાસઃ શુકાય પૈલાદીન્ હિત્વા ભાગવતં જગૌ ॥ ૪૮॥

શ્રીહરિં શરણં ગચ્છેત્પ્રામાયાં પરમાપદિ ।
દ્રૌણેર્બ્રહ્માસ્ત્રતઃ કૃષ્ણો રરક્ષ હિ પરીક્ષિતમ્ ॥ ૪૯॥

દુષ્ટાઃ સર્વેઽપિ હન્તવ્યા એકસ્મિન્નપકારિણિ ।
તક્ષકારિરહીનગ્નૌ જુહાવ જનમેજયઃ ॥ ૫૦॥

અયત્નેનૈવ દુર્લભ્યં પ્રાપ્યતે પુણ્યશાલિના ।

ઋષ્યશૃઙ્ગો નૃપસુતાં કર્ણં ચાધિરથો હ્યગાત્ ॥ ૫૧॥

દ્વિતીયાં નોદ્વહેદ્ભાર્યાં સુતાર્થી ત્વરયાન્વિતઃ ।
જ્યામઘો નાપ કિં પુત્રં શૈબ્યાયામેવ કાલાતઃ ॥ ૫૨॥

વૃથા વિદ્યાં પરીક્ષેત નૈવાધર્મં તુ નાચરેત્ ।
કુન્તી પ્રાપ્તા રવેઃ પુત્રં કૃષ્ણેનાધર્મિણો હતાઃ ॥ ૫૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સ્કન્ધોઽન્તં નવમોઽગમત્પરિલસન્ શ્લોકૈશ્ચ પઞ્ચાશતૈઃ ॥ ૫૪॥

ઇતિ શ્રીસુનીતિભાગવતે નવમસ્કન્ધઃ સમાપ્તઃ ॥

---

દશમઃ સ્કન્ધઃ - પૂર્વાર્ધઃ ।

દેવક્યામુદભૂન્નુતો વિધિમુખૈર્નન્દેષ્ટકૃદ્દુષ્ટહૃદ્-
ગોપીર્યોઽરમયત્સન્તશ્ચ સબલં કંસં ચ બાર્હદ્રથમ્ ।
જિત્વાઽઽજૌ નરકાનપિ કુરૂન્ સંનાશ્ય પાર્થપ્રિયો
રેમે સ્ત્રીસુતપૂર્વકૈર્નિરુપમૈઃ કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

લક્ષ્મીશોરુમતે લસદ્ગુણતતે સન્મધ્વપૂજારતે
ચીર્ણાગ્ર્યાનુસૃતે જિતારિસમિતે વ્યાખ્યાતશાસ્ત્રશ્રુતે ।
નિર્દોષાવગતે બુધાહિતનતે સત્કીર્તિપૂર્ણક્ષિતે
સેવે સાગરવેઙ્કટેશબુધ તે પાદામ્બુજં સદ્ધૃતે ॥ ૨॥

વર્ણિતં દશમે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

સ્વાર્થાદપ્યધિકં સન્તઃ પરકાર્યાર્થમુદ્યતાઃ ।
ભૂભારહૃતયે બ્રહ્મા વિષ્ણૂક્તમવદત્સુરાન્ ॥ ૪॥

દુષ્ટસ્ય મિત્રભવેન વિશ્વસ્યાન્ન વિચક્ષણઃ ।
શ્રુતાશરીરવાક્કંસો ભગિનીં હન્તુમુદ્યયૌ ॥ ૫॥

વિનાશં વિવિધોપાયૈઃ સદ્યઃ પ્રાપ્તં નિવારયેત્ ।
ઉક્ત્વા પુત્રાર્પણં શૌરિરરક્ષત્કંસતઃ પ્રિયામ્ ॥ ૬॥

નૈવ વિશ્વસનીયા વાગસતોઽવિજિતાત્મનઃ ।
કંસેન પ્રતિદત્તોઽપિ નાનન્દચ્છૌરિરાત્મજે ॥ ૭॥

સન્માર્ગં સન્ત્યજન્ત્યજ્ઞાઃ પરવાગ્ભિન્નબુદ્ધયઃ ।
સર્વાન્નિપીડયામાસ કંસો નારદબોધિતઃ ॥ ૮॥

કર્તું યદા યદીશેન પ્રોક્તં કાર્યં તથૈવ તત્ ।
દેવક્યા અનયદ્ગર્ભં યોગમાયા હિ રોહિણીમ્ ॥ ૯॥

સંધૃતસ્વમહાકર્યભારં સ્તુત્યા પ્રહર્ષયેત્ ।
પ્રાદુર્ભૂતોઽથ દેવક્યાં વિષ્ણુર્બ્રહ્માદિભિઃ સ્તુતઃ ॥ ૧૦॥

વસ્તૂત્તમમતિક્લેશં વિના ન પ્રાપ્યતે જનૈઃ ।
પિતૃસ્તુતો હરિઃ પ્રોચે સ્વજન્મ પ્રાક્તપઃ ફલમ્ ॥ ૧૧॥

સતિ દૈવસહાયે કિં કર્તું ન પ્રભવેન્નરઃ ।
વસુદેવો વ્રજે કૃષ્ણં ન્યસ્યાનિન્યે હિ ચણ્ડિકામ્ ॥ ૧૨॥

વારિતોઽપિ વિનાશ્યેષ્ટં મૂર્ખઃ પશ્ચાત્પ્રતપ્યતે ।
કંસસ્તાડિતકન્યોક્તઃ સ્વસૃશૌરી અસાન્ત્વયત્ ॥ ૧૩॥

અતિવિભ્રષ્ટબુદ્ધિઃ સ્યાત્સ્વયમજ્ઞોઽજ્ઞબોધિતઃ ।
સદ્વધાયાદિશદ્દૈત્યાન્ કંસઃ સંમન્ત્ર્ય મન્ત્રિભિઃ ॥ ૧૪॥

બાલે દૃષ્ટેઽપિ સામર્થ્યે જાયતે ન મહત્વધીઃ ।
રક્ષાં વિદધિરે ગોપ્યઃ પૂતનાઘાતિનો હરેઃ ॥ ૧૫॥

સાક્ષાદ્દ્રષ્ટુક્તમજ્ઞો ન શ્રદ્ધાતિ કુયુક્તિભાક્ ।
અનોક્ષભઙ્ગં સ્વીચક્રુર્ન ગોપઃ કૃષ્ણનિર્મિતમ્ ॥ ૧૬॥

રુદ્ધો યેન ન તં મુઞ્ચેત્તેન ત્યક્તુમપીચ્છિતઃ ।
શ્રીશો ગુરુસ્તૃણાવર્તનીતોઽમુઞ્ચંસ્તમાવધીત્ ॥ ૧૭॥

કેનાપ્યુપાયેનાત્મીયં મહિમાનં પ્રકાશયેત્ ।
જૃમ્ભમાણો મુખેઽનન્તો વિશ્વં માતુરદર્શયત્ ॥ ૧૮॥

સ્વકાર્યં સાધયેદ્ગૂઢો રહસ્યાપ્તેઽપ્યરેર્ભયે ।
ચકાર નામકરણં ગર્ગઃ શ્રીરામકૃષ્ણયોઃ ॥ ૧૯॥

યાદૃશો ધૃત આકારઃ કર્મ તાદૃશમાચરેત્ ।
વિતતાન વિભુર્બાલો બાલલીલાઃ પૃથગ્વિધાઃ ॥ ૨૦॥

મનસ્વી ન સ્વમાહાત્મ્યં બ્રૂયાત્કિન્તુ પ્રદર્શયેત્
મૃદોઽશનાદ્ધરિર્માત્રોપાલબ્ધોઽદર્શયજ્જગત્ ॥ ૨૧॥

સ્વભક્તવશ્યતાં યાયાદ્દર્શયિત્વાઽઽત્મદક્ષતામ્ ।
બન્ધં પ્રાપ યશોદાયા ભિત્વેશો દધ્યમત્રકમ્ ॥ ૨૨॥

ઉદ્ધરન્તિ વિપદ્ભ્યોઽન્યાનસ્વસ્થા અપિ સાધવઃ ।
કુબેરપુત્રૌ દેવર્ષેઃ શાપાત્પ્રભુરમોચયત્ ॥ ૨૩॥

સર્વો ભજતિ કાર્યાર્થં પ્રિયઃ કોઽપિ ન કસ્યચિત્ ।
ગોપા વૃન્દાવનં જગ્મુર્દૃષ્ટ્વોત્પાતાન્ બૃહદ્વને ॥ ૨૪॥

સત્સઙ્ગતિર્ન વા જાતિર્દુઃશીલસ્ય સુખપ્રદા ।
કૃષ્ણેન રક્ષતા વત્સાન્ વત્સરૂપોઽસુરો હતઃ ॥ ૨૫॥

દર્શિતોઽપિ સ્વસામર્થ્યે હન્યાદ્ભૂયઃ કૃતાગસમ્ ।
મુક્તોઽર્યાસ્યં દહન્ કૃષ્ણોઽભિનદ્ધાતોઘતં બકમ્ ॥ ૨૬॥

અભીષ્ટં સુલભં પુંસાં વિનષ્ટે વિઘ્નકર્તરિ ।
રામેણ નિહતે તાલફલાન્યાદન્હિ ધેનુકે ॥ ૨૭॥

સર્વસમ્પત્કરં નૃણાં મહત્કારુણ્યવીક્ષણમ્ ।
અજીવન્ હરિણા દૃષ્ટા ગોપા પીતવિષામ્ભસઃ ॥ ૨૮॥

બહૂનામર્થ ઇષ્ટાનાં પ્રિયમેકં પરિત્યજેત્ ।
મમર્દ કાલિયં વીક્ષ્ય નન્દાદીન્ દુઃખિતાન્ વિભુઃ ॥ ૨૯॥

લોકોપદ્રવકર્તારં સાધું નિષ્કાસયેદપિ ।
યમુનાયાઃ સ્તુતઃ કૃષ્ણઃ કૃષ્ણાહિમુદવાસયત્ ॥ ૩૦॥

વ્યસનં કેન ન પ્રાપ્તં પ્રભૂણાં કિં ન દુષ્કૃતમ્ ।
દહન્તં નિશિ ગોપાલાન્ દાવાગ્નિમપિબત્પ્રભુઃ ॥ ૩૧॥

નિહન્યાદ્વઞ્ચકં મિત્રં શઠત્વે પ્રકટે સતિ ।
પ્રલમ્બો હલિના ગોપરૂપ્યુદૂહ્ય દ્રવન્ હતઃ ॥ ૩૨॥

સુકરં મહતોઽન્યેષાં પ્રયત્નૈરપિ દુષ્કરમ્ ।
ગોપૈરલબ્ધાન્ વિભ્રષ્ટાન્ ગોગણાન્ હરિરાહ્વયત્ ॥ ૩૩॥

વ્યજ્યતે મહતાં શક્તિરાપદ્યેવ ન સમ્પદિ ।

દહ્યમાનાન્ જુગોપેશો ગોપાન્ પીત્વા વનાનલમ્ ॥ ૩૪॥

જહ્યાન્નૈવ સખીન્યોગ્યાન્ ભોજનક્રીડનાદિષુ ।
ક્રીડન્ જલાન્તિકે ગોપૈર્બુભુજેઽન્નં વનેઽચ્યુતઃ ॥ ૩૫॥

સદ્ગુણા યદિ વિદ્યન્તે વર્ણ્યન્તે તે સ્વતો જનૈઃ ।
શ્રુતવેણુરવાઃ કૃષ્ણક્રીડા ગોપ્યો હ્યવર્ણયન્ ॥ ૩૬॥

સ્વવસ્ત્વપ્યનુસૃત્યૈવ લભેતાગ્રસ્ય હસ્તગમ્ ।
મજ્જને ગોપિકા નગ્નાઃ કૃષ્ણાદ્વાસાંસિ લેભિરે ॥ ૩૭॥

ગુરવોઽપિ વિમુહ્યન્તિ ક્વચિન્નાજ્ઞા જના અપિ ।
મુકુન્દાયાર્પયન્નન્નં બ્રાહ્મણ્યો ન દ્વિજાતયઃ ॥ ૩૮॥

અપહાર્યં સ્વભક્તસ્યાપીષ્ટં  દર્પનિવૃત્તયે ।
નિવાર્યેન્દ્રમખં રૂપાન્તારેણાદદ્ધરિર્બલિમ્ ॥ ૩૯॥

પ્રાપ્તાપદ્યન્નિમિત્તં યા વાર્યા તેનૈવ સા ભવેત્ ।
ઇન્દ્રાતિવૃષ્ટેર્ધૃત્વાવીદ્વ્રજં ગોવર્ધનં વિભુઃ ॥   ૪૦॥

કુપિતા અપિ યોગેન મૃદવઃ સ્યુર્હિ સજ્જનાઃ ।
સ્તુતોઽભિષિક્તો ગોવિન્દઃ સ્વર્ગં શક્રમવાપયત્ ॥ ૪૧॥

સિદ્ધ્યં વિધેય ઉદ્યોગઃ સ્વયોગ્યોઽપિ મહાત્મભિઃ ।
પાશિલોકં પ્રભુર્ગત્વા પિતરં પ્રત્યુપાનયત્ ॥ ૪૨॥

મહતાઙ્ગીકૃતોઽભીષ્ટદાનેન પરિપાલ્યતે ।
દર્શયામાસ નન્દાદીન્ વૈકુણ્ઠં નન્દનન્દનઃ ॥ ૪૩॥

પ્રાપ્તસ્યાત્મગતિત્વેન કાર્યં સર્વમભીપ્સિતમ્ ।
કાલિન્દ્યાં ગોપિકા ગાનાકૃષ્ટા હરિરરીરમત્ ॥ ૪૪॥

મદાહઙ્કારનાશાય સ્વકીયમપિ ખેદયેત્ ।
અન્તર્હિતો વિભુઃ સ્ત્રીભિઃ ક્રીડન્નપ્યેકયા પુનઃ ॥ ૪૫॥

સ્વજનસ્ય ગતે ગર્વે વિદધ્યાદધિકં પ્રિયમ્ ।
ગોપિકાભિઃ સ્તુતો રાસોત્સવેનારમયત્પ્રભુઃ ॥ ૪૬॥

વરં પાદપ્રહારોઽપિ શ્રેષ્ઠાન્માનો ન નીચતઃ ।
સુદર્શનોઽભૂચ્છ્રીશાઙ્ઘ્રેઃ સ્પર્શાન્નન્દં ગ્રસન્નહિઃ ॥ ૪૭॥

આપત્પ્રદોઽવિવેકોઽતો ન કુર્યાત્સહસા ક્રિયામ્ ।
વિભુના કાલયન્ ગોપીઃ શઙ્ખચૂડો નિપાતિતઃ ॥ ૪૮॥

સંસ્તુવન્તિ પરોક્ષેઽપિ ગુણાઢ્યં ગુણિનો જનાઃ ।
રેમિરેઽહસ્સુ ગાયન્ત્યઃ કૃષ્ણલીલાં વ્રજસ્ત્રિયઃ ॥ ૪૯॥

સાધૂપદ્રવકૃત્સાધુરૂપશાલ્યપિ ભજ્યતે ।
વૃષાશ્વરૂપૌ નિહતૌ પ્રભુણારિષ્ટકેશિનૌ ॥ ૫૦॥

મિથો વિરોધિનોર્દક્ષઃ સ્યાદ્દ્વયોરપિ સમ્મતઃ ।
કંસેન માનિતોઽભ્યેત્ય શ્રીશં તુષ્ટાવ નારદઃ ॥ ૫૧॥

ક્રીડાર્થં કથિતં વ્યાજાત્સત્યં કુર્વન્વિપદ્યતે ।
વ્યોમો મેષાયિતાન્ ગોપાંશ્ચોરયન્ હરિણા હતઃ ॥ ૫૨॥

ગૂઢમન્ત્રોઽર્થતત્ત્વજ્ઞો દયાલુર્દુઃખિતો ભવેત્ ।
અક્રૂરાકારિતોઽનન્તો ગચ્છન્ ગોપીરસન્ત્વયત્ ॥ ૫૩॥

પ્રવૃદ્ધેઽનુગ્રહેઽભીષ્ટં વિદધ્યાદ્વિબુધોઽધિકમ્ ।
માધવોઽદર્શયદ્રૂપં સ્વમક્રૂરાય મજ્જતે ॥ ૫૪॥

કોપપ્રસાદયોર્ધીમાન્ ફલં સદ્યઃ પ્રદર્શયેત્ ।
કૃષ્ણો રજકસદ્ધમૃસુદામ્નાં પર્યદર્શયત્ ॥ ૫૫॥

અસાધુ સાધુ કુરુતે પ્રભુશ્ચાગ્ર્યમનુત્તમમ્ ।
ઋજ્વીં ચક્રે ત્રિવક્રાં ચ બભઞ્જ ધનુરીશ્વરઃ ॥ ૫૬॥

સ્વયં વ્રજેન્ન યુદ્ધાર્થં ન મુઞ્ચેત્સમુપાગતાન્ ।
ચાપરક્ષાન્ બલં ચેશો ગજં મલ્લાનનાશયત્ ॥ ૫૭॥

પરોઽપિ હિતકારી સ્વઃ આત્મીયોઽપ્યહિતઃ પરઃ ।
નિહત્ય માતુલં કંસં કૃષ્ણઃ સર્વાનનન્દયત્ ॥ ૫૮॥

સતામનુસરેન્માર્ગં નિષેવેત વિપશ્ચિતઃ ।
ગર્ગોપનીતો ગોવિન્દો ભેજે સાન્દીપનિં ગુરુમ્ ॥ ૫૯॥

કો ન વધ્યઃ કૃતદ્રોહઃ કિં ન દેયં મહાત્મને ।
યમાર્ચિતઃ પઞ્ચજનં હત્વેશોઽદાદ્ગુરોઃ સુતમ્ ॥ ૬૦॥

ભવેન્મનઃ સમાધાનં નિજવલ્લભભાષિતૈઃ ।
ઉદ્ધવઃ કૃષ્ણસન્દેશૈર્જહારાધિં વ્રજૌકસામ્ ॥ ૬૧॥

ઇષ્ટં સ્વસનતસ્યૈવ વિદધાતિ મહાનપિ ।
સૈરન્ધ્રીં ચ તથાક્રૂરં ભગવાન્ પર્યતોષયત્ ॥ ૬૨॥

નિરાશ્રયે કૃપાં કુર્યાત્ખિન્ને બાલે ચ દુર્બલે ।
બુબુધે પાર્થવૃત્તાન્તં સમ્પ્રેષ્યાક્રૂરમચ્યુતઃ ॥ ૬૪॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
ષષ્ઠ્યા શ્લોકવરૈર્લસદ્ધિ દશમે સ્કન્ધેઽર્ધમાદ્યં ત્વગાત્ ॥ ૬૪॥

ઇતિ શ્રીસુનીતિભાગવતે દશમસ્કન્ધે પૂર્વાર્ધઃ સમાપ્તઃ ॥

---

દશમઃ સ્કન્ધઃ - ઉત્તરાર્ધઃ ।

મુખ્યં પ્રાગેવ નો હન્યાદ્દુષ્ટમપ્યપકારિણમ્ ।
જરાસન્ધં મુમોચાજઃ સૈન્યં હત્વા મુહુર્મહત્ ॥ ૬૫॥

મન્યતેઽનુગુણં કાર્યે વિપ્રવાક્યં જનાર્દનઃ ।
સ્વપુરાન્નિર્ગતો રામાદનુજ્ઞામાપ સાગ્રજઃ ॥ ૬૬॥ (પરશુરામાત્)

સ્વભ્રાતાપિ પ્રહર્તવ્યં પાપાત્મા સ્વવધોદ્યતઃ ।
સૃગાલવાસુદેવઃ શ્રીવાસુદેવેન સૂદિતઃ ॥ ૬૭॥

સિધ્યતિ સ્વયમેવેષ્ટં પુરુષસ્ય મહાત્મનઃ ।
કૃષ્ણમૂર્ધ્નિ હરેર્મૌલિં ગોમન્તે ગરુડો ન્યધાત્ ॥ ૬૮॥

મહાત્માનો વિના યત્નં દુર્ઘટં ઘટયન્ત્યહો ।
નિનાય દ્વારકાં શ્રીશો મધુરાયાં સ્થિતાન્નિજાન્ ॥ ૬૯॥

સ્વાનુગ્રહાય ભક્તેન કારયેન્મહતીં ક્રિયામ્ ।
દદાહ યવનં શાર્ઙ્ગી મુચુકુન્દાક્ષિવહ્નિતઃ ॥ ૭૦॥

ફલન્તિ નિજકર્માણિ પુંસાં નૈવ મહાન્ પુમાન્ ।
મુચુકુન્દો મુદં કૃષ્ણાદયાન્મ્લેચ્છબલં ક્ષયમ્ ॥ ૭૧॥

વિદ્રવન્તમપિ શ્રેષ્ઠમશક્તોઽપ્યનુધાવતિ ।
રામકૃષ્ણૌ જરાસન્ધોઽન્વગચ્છત્સહ સેનયા ॥ ૭૨॥

ન ક્ષુદ્રોપદ્રવં ધીરો ગણયત્યુરુપૌરુષઃ ।
હરિરુત્પત્ય ગોમન્તાદ્દહ્યમાનાત્પુરીં યયૌ ॥ ૭૩॥

નિશ્ચયેન સતી વાર્તા જ્ઞેયા કૌતુકકારિણી ।
પ્રભુર્દ્રુપદબન્ધાદિ જ્ઞાતવાન્ કૃતવર્મતઃ ॥ ૭૪॥

પ્રાપ્તિયોગ્યં હિ યદ્યસ્ય સંપ્રાપ્નોતિ તમેવ તત્ ।
પ્રપેદે રેવતીં રામઃ પ્રિયામાદિયુગોદ્ભવામ્ ॥ ૭૫॥

ગુણવાન્ પ્રાર્થ્યતે સર્વૈર્બલવાઁલ્લભતેઽખિલમ્ ।
રુક્મિણ્યાર્થિત આપેશઃ પાર્થિવાન્ પરિભૂય તામ્ ॥ ૭૬॥

ચ્યવતે દૈવહીનસ્ય હ્યેકં સન્ધિત્સતોઽપરમ્ ।
આનેતું રુક્મિણીં યાતુશ્ચ્યુતં શ્મશ્ર્વાદિ રુક્મિણઃ ॥ ૭૭॥

એકા ક્રિયા દ્વ્યર્થકરી ક્રિયાવિધિવિદા ભવેત્ ।
મણિં જામ્બવતીં ચાપ મણ્યર્થં પ્રગતઃ પ્રભુઃ ॥ ૭૮॥

હેતુઃ સર્વાર્થસંસિદ્ધેર્દાનાદન્યો ન વિદ્યતે ।
સત્રાજિદ્ધરયે સત્યાં સ્વાઘોઽપહૃતયે દદૌ ॥ ૭૯॥

લોકાનુસાર્યભિજ્ઞોઽપિ વિદધ્યાત્સમયોચિતમ્ ।
કુલ્યહેતોઃ કુરૂન્ યાતઃ સત્યોક્તોઽજઃ શુચા યયૌ ॥ ૮૦॥

પ્રવૃત્તિર્મહતો ન સ્યાન્નિઃસ્પૃહસ્યાપિ નિષ્ફલા ।
વિદ્ધલક્ષ્યાન્ દદર્શેશઃ પાર્થાન્ દ્રુપદરાટ્પુરે ॥ ૮૧॥

ન શ્રોતવ્યં પરપ્રોક્તમાત્મૈવ ફલભુગ્યતઃ ।
શતધન્વા હતોઽક્રૂરનિરસ્તશ્ચક્રિણા દ્રવન્ ॥ ૮૨॥

સામ્ના સિધ્યન્તિ કાર્યાણિ દુઃસાધ્યાન્યખિલાન્યપિ ।
પ્રકાશ્ય મણિમક્રૂરેઽક્રોધં રામં વિભુર્વ્યધાત્ ॥ ૮૩॥

સ્વાભીષ્ટમપ્યવાપ્નોતિ પરેષ્ટકરણે રતઃ ।
ગતેન્દ્રપ્રસ્થ ઈશોઽગાત્કાલિન્દીં યમુનાતટે ॥ ૮૪॥

યસ્યાર્હં યદ્ભવેદ્વસ્તુ પ્રસાધ્યં તસ્ય તત્કૃતે ।
ધર્મજસ્ય વિભુર્વિશ્વકર્મણાચીકરત્પુરમ્ ॥ ૮૫॥

સ્વેષ્ટં ક્વચિદ્બલાત્પ્રાપ્યં ક્વચિત્કૃત્વા પરેપ્સિતમ્ ।
મિત્રવિન્દાં જહારાજો નીલાં બદ્ધ્વાઽપ ગોવૃષાન્ ॥ ૮૬॥

સ્વપ્રિયં પ્રાપ્નુયાદ્દત્તં નિરુદ્ધં નિજપૌરુષાત્ ।
પ્રદત્તાં જગૃહે ભદ્રાં લક્ષણાં જહ્નુ ઈશ્વરઃ ॥ ૮૭ ॥

સંવિજ્ઞાપિતમાત્રઃ સ્યાત્સત્પ્રભુઃ કાર્યકારકઃ ।
શક્રવિજ્ઞાપિતો ભૌમં હન્તું સત્યાપતિર્યયૌ ॥ ૮૮ ॥

ક્રિયાસિદ્ધિર્ભવેત્સત્ત્વે મહતાં ન તુ સાધને ।
મુરાદીનપ્યસેનોઽહન્નરકં તાર્ક્ષ્યવાહનઃ ॥ ૮૯ ॥

તસ્યેષ્ટં કુરુતેઽગ્ર્યોઽપિ યસ્ય સન્ત્યુત્તમા ગુણાઃ ।
ભગદત્તં પ્રમાન્યેશઃ કામિનીઃ પ્રાહિણોત્પુરીમ્ ॥ ૯૦ ॥

યદર્થં હિ મહાન્ યત્નઃ કૃતોઽન્તે તન્ન વિસ્મરેત્ ।
ઇન્દ્રાર્ચિતોઽદિતેઃ પ્રીતિં કુણ્ડલાભ્યાં વિભુર્વ્યધાત્ ॥ ૯૧ ॥

સ્વમિત્રાદપિ ભીતઃ સન્નુત્તમં વસ્તુ ગોપયેત્ ।
પારિજાતં પ્રજગ્રાહ સત્યભામાર્થિતોઽચ્યુતઃ ॥ ૯૨ ॥

સ્વસ્વરૂપમવિજ્ઞાય ક્ષીયન્તે રચિતોદ્યમાઃ ।
સર્વે દેવા ગતા યોદ્ધું સેશેન્દ્રાઃ શાર્ઙ્ગિણા જિતાઃ ॥ ૯૩ ॥

ત્યજાતિવૈરમાત્મીયે પ્રકૃતાર્થં પ્રસાધય ।
પુરીમિન્દ્રસ્તુતોઽભ્યેત્ય સ્વર્દ્રુણાનન્દયત્પ્રભુઃ ॥ ૯૪ ॥

નિજ એવ નિજો હિ સ્યાદ્યઃ પરઃ પર એવ સઃ ।
પ્રદ્યુમ્નઃ શમ્બરં હત્વા પિતૃપ્રીતિં વ્યધત્ત યત્ ॥ ૯૫ ॥

મહત્સાદૃશ્યમાપ્તોઽપિ કિં નીચસ્તત્સમો ગુણૈઃ ।
ધૃતોરુશઙ્ખચક્રાદિઃ પૌણ્ડ્રકશ્ચક્રિણા હતઃ ॥ ૯૬ ॥

સ્વસ્ય સ્વકૃતમેવ સ્યાન્નાશાયાવલિનઃ ખલુ ।
સુદક્ષિણં સ્વકૃત્યાગ્નિશ્ચક્રપ્રતિહતોઽદહત્ ॥ ૯૭ ॥

પુણ્યક્ષેત્રાણિ સેવેત પુણ્યકાલેઽપિ સન્મતિઃ ।
સમન્તપઞ્ચકં શ્રીશઃ સભાર્યોઽગાદ્રવિગ્રહે ॥ ૯૮ ॥

કો ન યાતિ મુદં લોકે સત્કૃતઃ પ્રભુણા ભૃશમ્ ।
નન્દપાર્થમુખાસ્તુષ્ટા મિલિતા હરિમાનિતાઃ ॥ ૯૯ ॥

સત્યાં સાધનસમ્પત્તાવેવ ધર્મં સમાચરેત્ ।

વસુદેવોઽધ્વરં કૃત્વા મુન્યુક્તો દ્વારકામયાત્ ॥ ૧૦૦॥

પુત્રઃ સ એવ યોઽભીષ્ટં કુર્યાન્માતુસ્તથા પિતુઃ ।
તત્ત્વાન્યુક્ત્વાચ્યુતો માતુર્બલીઝ્યોઽદર્શયત્સુતાન્ ॥ ૧૦૧॥

ભવત્યસહ્યં હાસાર્થમુક્તમપ્યતિવિપ્રિયમ્ ।
ભૈષ્મ્યા નર્મોક્તિતઃ ખેદં પ્રેક્ષ્યેશસ્તામશાન્તયત્ ॥ ૧૦૨॥

યૌવનં ભર્તૃસઙ્ગેન પુત્રોત્પત્યા ચ ભાતિ સઃ ।
એકૈકશો દશ દશ પુત્રાન્ પ્રાપુર્હરેઃ પ્રિયાઃ ॥૧૦૩॥

વદેચ્છલેન યોઽસત્યં દણ્ડ એવ તદુત્તરમ્ ।
રુક્મિણં ગ્લહજિદ્રામઃ પૌત્રોદ્વાહોત્સવેઽવધીત્ ॥૧૦૪॥

નાસ્ત્યેવ વનિતાભ્યોઽન્યત્ ત્રિલોક્યાં સુખદાયકમ્ ।
શ્રીશઃ ષોડશસાહસ્રૈર્દારૈ રેમે શતાધિકૈઃ ॥૧૦૫॥

કાર્યાણિ નિર્વહત્યેકઃ સમર્થઃ સુબહૂન્યપિ ।
ક્રિયાકૃન્નારદેનેશો દૃષ્ટઃ પ્રત્યઙ્ગનાગૃહમ્ ॥૧૦૬॥

બહુભિર્હેતુભિઃ કાર્યમેકમારભતે બુધઃ ।
ઇન્દ્રપ્રસ્થં સ ઉક્તોઽયાદ્દૂતનારદસૂદ્ધવૈઃ ॥ ૧૦૭॥

સુસંમન્ત્ર્ય પ્રવૃત્તસ્ય સિદ્ધિરવ્યભિચારિણી ।
ભીમઃ પ્રાપ્ય જરાસન્ધં જઘાન હરિસંમતઃ ॥ ૧૦૮॥

સ્વયં યદિ ભવેત્સાધુર્લભેદેવ સ મઙ્ગલમ્ ।
સહદેવોઽભિષિક્તશ્ચ ભૂપાઃ કૃષ્ણેન મોચિતાઃ ॥ ૧૦૯॥

ન શ્રાવયેદ્વચઃ ક્રૂરં મત્સરં ચ પરિત્યજેત્ ।
યજ્ઞોત્સવે જઘાનાજશ્ચૈદ્યમાપ્તાગ્રપૂજનઃ ॥ ૧૧૦॥

મહાનારબ્ધકાર્યસ્ય સમાપ્તિકરણં ગુણઃ ।
પાર્થાનાં પૂરયિત્વાગાદ્રાજસૂયં પ્રભુઃ પુરમ્ ॥ ૧૧૧॥

અપકારપ્રતીકારં સદ્યઃ કુર્યાત્સ્વભીતયે ।
પ્રેક્ષ્યાદ્રુત્ય પુરં ભગ્નં શાલ્વં હત્વાચ્યુતોઽવિશત્ ॥ ૧૧૨॥

મિત્રં વિપદિ સમ્પત્તાવપિ તુલ્યક્રિયં હિ યત્ ।
આકર્ણ્યાપ્લવનાત્પાર્થાનાશ્વાસ્યેશોઽગમત્પુરમ્ ॥ ૧૧૩॥

સંસર્ગ એવ મહતાં ફલાય મહતે ભવેત્
કૃષ્ણહસ્તામ્બુજસ્પર્શાન્નૃગો મુક્તઃ કુયોનિતઃ ॥ ૧૧૪॥

અકૃતોપદ્રવો લોકે પૂજ્યતે ન મહાનપિ ।
વ્રજં ગતેન રામેણાકૃષ્ટા તં યમુનાર્ચયત્ ॥ ૧૧૫॥

સ નશ્યત્યેવ શીઘ્રં યઃ કરોત્યુત્તમહેલનમ્ ।
લોકદ્વિટ્ દ્વિવિદો ધૂર્તો હલિના નિહતઃ કપિઃ ॥ ૧૧૬॥

નીચાત્સિધ્યતિ કોઽપ્યર્થો ન સામ્ના કિન્તુ દણ્ડતઃ ।
સસામ્બોઽગાદ્બલઃ પુર્યાં કૃષ્ટાયા કુરુભિઃ સ્તુતઃ ॥ ૧૧૭॥

ધનિકે નિર્ધને  વાપિ ભક્તે કાર્યોઽત્યનુગ્રહઃ ।
હરિર્ગત્વા મુદં ચક્રે મૈથિલશ્રુતદેવયોઃ ॥ ૧૧૮॥

ઉપકારં ન કુર્વીત નાશે પ્રામેઽપિ દુર્મતેઃ ।
શમ્ભુર્દત્તવરો ભીતો વૃકાદ્વૈકુણ્ઠમાવ્રજત્ ॥ ૧૧૯॥

યુક્ત્યા યત્સુકરં ભૂરિપૌરુષૈસ્તન્ન સાધયેત્ ।
વાક્યૈર્વ્યનાશયદ્વિષ્ણુર્દારકો મોહયન્વૃકમ્ ॥ ૧૨૦॥

તે શ્રેષ્ઠા વિક્રિયન્તે ન યે હેતૌ વિકૃતે સતિ ।
ભૃગુણાઙ્ઘ્રિપ્રહારોઽપિ નતોઽગ્ર્યો નિશ્ચિતોઽચ્યુતઃ ॥ ૧૨૧॥

ભાવિ જાનન્નપિ હિતં વદેદનપકીર્તયે ।
ઉપપ્લાવ્યે ગતઃ પાર્થાન્દૂત્યં ચક્રે જગત્પતિઃ ॥ ૧૨૨॥

નઙ્ક્ષ્યન્તં ન સ્વતો હન્યાદ્ભીષયેતાભિભાવુકમ્ ।
પ્રદર્શ્યાનન્તરૂપત્વં કૃષ્ણોઽગાદ્બદ્ધુમિચ્છિતઃ ॥ ૧૨૩॥

દૂષણત્વમવાપ્નોતિ ગુણોઽપ્યસમયે નૃણામ્ ।
પ્રબોધ્યેશેન યુદ્ધાય વિરક્તઃ પ્રેરિતોઽર્જુનઃ ॥ ૧૨૪॥

નૈવ કુર્યાત્સમર્થોઽપિ કિઞ્ચિદન્યસ્ય કીર્તયે ।
નીત્વાર્જુનં શિવોપાન્તં પ્રાપ્તેઽસ્ત્રેઽભ્યગમદ્ધરિઃ ॥ ૧૨૫॥

ભવિતવ્યં ભવત્યેવ સ્વકાલે સમુપસ્થિતે ।
શાન્તેનાપિ હતઃ સૂતો રામેણ મુનિમાનિતઃ ॥ ૧૨૬॥

અપકૃત્યા સુધીઃ ખિન્નાનુપકૃત્યા પ્રહર્ષયેત્ ।
ઋષીણામિષ્ટકૃદ્દૈત્યમવધીદ્બલ્વલં બલઃ ॥ ૧૨૭॥

દોષં કુર્યાન્ન કસ્યાપિ વિશેષાદ્બલશાલિનઃ ।
દુર્યોધનોઽપિ ભીમેન સાનુબન્ધો હતો દ્વિષન્ ॥ ૧૨૮॥

સમર્થાનપિ કાર્યાસ્યૈ કર્તવ્યો બૃહદાશ્રયઃ ।
પ્રપેદિરે મહદ્રાજ્યં પાણ્ડવાઃ કેશવં શ્રિતાઃ ॥ ૧૨૯॥

ગૃહીત્વૈકમસઙ્ખ્યાતં પ્રદદાતિ મહામતિઃ ।
સમ્પદોઽદાત્કુચેલાય હરિઃ પૃથુકમુષ્ટિભુક્ ॥ ૧૩૦॥

કાર્યા નૈવાત્મનઃ શ્લાઘા પ્રતિજ્ઞાપ્યતિગર્વિતઃ ।
દ્વિજાત્મજપ્રદાનેઽતિક્લેશમાપ યતોઽર્જુનઃ ॥ ૧૩૧॥

અશ્વમેધમપિ ત્યક્ત્વા કુર્યાન્મિત્રેપ્સિતં દ્રુતમ્ ।
આનીયેશઃ સ્વધામ્નોઽદાત્સાર્જુનો વિપ્રબાલકાન્ ॥ ૧૩૨॥

ન કરોતિ સ યો વક્તિ વિધત્તે સ ન વક્તિ યઃ ।
વિકત્થમાનઃ કૃષ્ણેન દન્તવક્ત્રો નિષૂદિતઃ ॥ ૧૩૩॥

નિસ્તીર્ણસર્વકાર્યાબ્ધિર્નિતરાં પરિમોદિતે ।
રેમે સ્ત્રીપુત્રપૌત્રાદ્યૈર્દ્વારકાયાં શ્રિયઃપતિઃ ॥ ૧૩૪॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
સપ્તત્યા દશમેઽર્ધમન્તમપરં સ્કન્ધે સુપદ્યૈરગાત્ ॥ ૧૩૫॥

ઇતિ શ્રીસુનીતિભાગવતે દશમસ્કન્ધે ઉત્તરાર્ધં સમાપ્તમ્ ॥

---

એકાદશઃ સ્કન્ધઃ ।

યસ્ય પ્રેરણયા દ્વિજા યદુકુલં શેપુશ્ચ યો વર્ણિતઃ
કવ્યાદ્યૈરપિ નારદેન ગતયે ધામ્નોઽર્જિતોઽજાદિભિઃ ।
સદ્વિપ્રોદ્ધવમુખ્યભક્તસુખકૃન્નીત્વા ક્ષયં યાદવાન્
ધામાપ્તો વિજયો યદિષ્ટમકરોત્કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૧॥

શ્રીકૃષ્ણં વૃણુતે જગન્તિ પુનતે મધ્વં ચ યે પ્રીણતે
સદ્ધર્માન્ બ્રુવતે પ્રિયં પ્રદદતે સત્તત્ત્વમામન્વતે ।
ન સ્સ્વાન્ સંસ્તુવતે ગુણાન્ વિદધતે શ્રેયો યશસ્તન્વતે

દુષ્ટાન્ સંધુનતે હ્યઘં વિલુનતે સન્તઃ પ્રસીદન્તુ તે ॥ ૨॥

ગીતમેકાદશે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

ફલત્યેવ દ્વિજસ્યોક્તિર્વિશિષ્ટસ્ય વિશેષતઃ ।
સમ્પ્રાપ્તં મુસલં વિપ્રશાપાદ્યદુકુમારકૈઃ ॥ ૪॥

લભતે મહતોઽભીષ્ટમપકુર્વન્નપિ ક્વચિત્ ।
કામાદ્યા ઉર્વશીં ચાર્વીં પ્રાપુર્નારાયણાન્મુનેઃ ॥ ૫॥

સ્વયમેવ હિતોપાયં પૃચ્છેત્કુર્યાદ્યથોદિતમ્ ।
કવ્યાદ્યુક્તાન્નિમિર્ધર્માનાતિષ્ઠન્નાપ સદ્ગતિમ્ ॥ ૬॥

સતાં ગુરૌ પ્રકૃત્યૈવ વિનયો વ્યસનં શ્રુતૌ ।
વસુદેવો ભાગવતાન્ ધર્માન્ શુશ્રાવ નારદાત્ ॥ ૭॥

યોગ્યં કિઞ્ચિદપિ સ્વેષ્ટં સતાં સમ્મતમાચરેત્ ।
ઇયેષ ધામ ગન્તું સ્વં કૃષ્ણો બ્રહ્મમુખર્થિતઃ ॥ ૮॥

હિતાહિતે નરં સ્વીયં વેદયન્ત્યેવ સજ્જનાઃ ।
ઉત્પાતેષૂદ્ધવં ભક્તં કૃષ્ણો દૃષ્ટેષ્વબોધયત્ ॥ ૯॥

સદ્બુદ્ધ્યૈવ પ્રકર્તવ્યં સ્વકીયં સકલં જનૈઃ ।
અવધૂતો ગુરૂનૂચે યદવે બુદ્ધ્યુપાશ્રિતાન્ ॥ ૧૦॥

મહાધિકારિણોઽભીશ્ટં ચિન્તનાદેવ સિધ્યતિ ।
હંસોઽજચિન્તિતસ્તત્ત્વં સનકાદિભ્ય ઉક્તવાન્ ॥ ૧૧॥

સર્વસમ્પત્સુ નષ્ટાસુ સદ્બુદ્ધિર્જાયતે નૃણામ્ ।
ખિન્નઃ ક્ષીણધનો ભિક્ષુરાવન્ત્યોઽભૂદ્દ્વિજઃ સુધીઃ ॥ ૧૨॥

સ્વધર્માન્નોચ્ચલેજ્જાનન્સુખદુઃખપ્રદં મનઃ ।
ન ચુકોપ સ્વધર્મસ્થો ભિક્ષુર્દુષ્ટૈરુપદ્રુતઃ ॥ ૧૩॥

દુઃખકૃદ્વિષયાસઙ્ગો વૈરાગ્યં સુખસાધનમ્ ।
નિર્વેદેનોર્વશીત્યક્તઃ સુખં પ્રાપ પુરૂરવાઃ ॥ ૧૪॥

પ્રાજ્ઞં  પ્રત્યેવ સાધૂપદેશઃ સ્યાન્ન નિરર્થકઃ ।
ઉદ્ધવો હરિણા પ્રોક્તો યયૌ બદરિકાશ્રમમ્ ॥ ૧૫॥

યતેત શ્રેયસે તાવદ્યાવત્સ્વસ્થં કલેવરમ્ ।
પ્રભાસમાપ્ય કૃષ્ણોક્તા યાદવા ધર્મમાચરન્ ॥ ૧૬॥

અદૃષ્ટવશતો ભાવિ  નિરોદ્ધું કઃ પ્રભુર્ભવેત્ ।
ઉન્મત્તા યાદવાઃ પ્રાપ્તાઃ ક્ષયં ઘ્નન્તો મિથસ્તૃણૈઃ ॥ ૧૭॥

નોપકારોઽપકારશ્ચ ભક્તિરેવ પ્રયોજિકા ।
વિદ્ધઃ સ્તુતો જરાવ્યાધં ભગવાનનયદ્દિવમ્ ॥ ૧૮॥

સર્વાનપ્યુદ્ધરેત્કૃચ્છ્રાદ્વિશેષેણોદ્ધારેન્નિજાન્ ।
ઇન્દ્રપ્રસ્થાપ્તયેઽન્યેષાં કૃષ્ણો દારુકમાદિશત્ ॥ ૧૯॥

પ્રભુઃ સમ્માન્યતે સાર્વૈર્નિતાન્તમુપકારકઃ ।
કૃષ્ણો વિવેશ ધામ સ્વં સ્તૂયમાનોઽબ્જજાદિભિઃ ॥ ૨૦॥

કિં દેહેનાખિલાર્થૈઃ કિં મહાત્મવિરહો યદિ ।
કૃષ્નાદીન્ વસુદેવાદ્યા અપશ્યન્તો જહુસ્તનૂઃ ॥ ૨૧॥

ધીરો હિ કુરુતે ધૈર્યં વિહિતં ચ વિપદ્યપિ ।
અર્જુનઃ કારયામાસ બન્ધૂનાં સાંપરાયિકમ્ ॥ ૨૨॥

સ સુહૃદ્યો દદાતીષ્ટં ન જહાતિ વિપદ્ગતમ્ ।
સર્વાન્નીત્વાર્જુનો વજ્રમિન્દ્રપ્રસ્થેઽભ્યષેચયત્ ॥ ૨૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે
ઽગાચ્છ્લોકૈર્દશભિર્લસન્ દ્વિગુણિતૈઃ સ્કન્ધોઽન્તમેકાદશઃ ॥ ૨૪॥

ઇતિ શ્રીસુનીતિભાગવતે એકાદશસ્કન્ધઃ સમાપ્તઃ ॥

---

દ્વાદશઃ સ્કન્ધઃ ।

બ્રહ્માદ્યાઃ સ્તુવતે રમાપિ જુષતે સમ્યઙ્ ન યં જાનતે
કેઽપ્યુત્પાદયતે જગત્સમુચિતે કાલે સ્મ યસ્ત્રાયતે ।
એકઃ સંહરતે તથા સ નુદતે જ્ઞાનાદિદો દ્યોતતે
ભક્તાન્ પ્રીણયતે સ્વધામ નયતે નારાયણઃ પ્રીયતામ્ ॥ ૧॥

કલ્કી યો જનમેજયઃ પિતૃવધાદારબ્ધસર્પાધ્વરા-

યદ્દાસો વિરતો યજૂંષિ સવિતુઃ શ્રીયાજ્ઞવલ્ક્યોઽધ્યગાત્ ।
માર્કણ્ડેયમુનિર્જિતસ્મરમુખોઽપશ્યલ્લયં ચાચ્યુતઃ
યદ્ભક્ત્યાદિ વરાનવાપ ગિરિશાત્કૃષ્ણઃ સ નો રક્ષતાત્ ॥ ૨॥

વર્ણિતં દ્વાદશે સ્કન્ધે ભગવદ્ભક્તસદ્યશઃ ।
ગીયતે નીતિરૂપેણ વિષ્ણુવૈષ્ણવતુષ્ટયે ॥ ૩॥

કાર્યોઽન્યેષુ ન વિશ્વાસઃ સર્વેષ્વપિ કલૌ યુગે ।
રિપુઞ્જયાદ્યા નિહતાઃ સ્વકીયૈર્મુનિકાદિભિઃ ॥ ૪॥

યદા યદુચિતં પ્રાજ્ઞો  વિદધાતિ તદૈવ તત્ ।
હનિષ્યત્યસતઃ કલ્કી શુકો રાજ્ઞાર્ચિતો યયૌ ॥ ૫॥

ધનૈઃ કો વશ્યતાં નૈતિ પ્રયત્નૈઃ કિં ન સાધ્યતે ।
કાશ્યપં તર્પયિત્વાર્થૈર્નૃપતિં તક્ષકોઽદશત્ ॥ ૬॥

ક્ષુદ્રાન્ કૃતપરદ્રોહાન્નાઙ્ગીકુર્યાદ્બૃહન્નપિ ।
તક્ષકાઙ્ગીકૃતેરિન્દ્રઃ સર્પસત્રે પ્રચાલિતઃ ॥ ૭॥

માન્યાન્ સમ્માનયેજ્જહ્યાત્સ્વાયોગ્યકરણે રતિમ્ ।
સર્પસત્રાન્નિવવૃતે ગુરૂક્તો જનમેજયઃ ॥ ૮॥

ન નશ્યતિ દુરુક્ત્યા કિં સદુક્ત્યા કિં ન સિધ્યતિ ।
યાજ્ઞવલ્ક્યો ગુરુત્યક્તો યજૂંષ્યાપ સ્તુતાદ્રવેઃ ॥ ૯॥

નિઃસ્પૃહસ્ય તૃણં સર્વં મહદુલ્લઙ્ઘિતુસ્તથા ।
જેતું શેકુર્ન કામાદ્યા માર્કણ્ડેયં જિતાન્તકમ્ ॥ ૧૦॥

કામયન્તે ગરીયાંસો બૃહદેવ ન ચાત્યણુ ।
માયાં દ્રષ્ટું યયાચે સ મુનિર્નારાયણં મુનિમ્ ॥ ૧૧॥

ક્વચિદ્બિભેતિ ધીરોઽપિ ક્વચિદ્ધૃષ્યતિ વિસ્મિતઃ ।
માર્કણ્ડેયો લયે ભીતો દૃષ્ટે વિષ્ણાવમોદત ॥ ૧૨॥

ગુણિનામેવ કુર્વન્તિ પ્રિયમપ્રાર્થિતા અપિ ।
વિષ્ણુભક્ત્યાદિ રુદ્રોઽદાન્માર્કણ્ડેયાય મોદિતઃ ॥ ૧૩॥

લક્ષ્મીશોરુમતેર્લસદ્ગુણતતેઃ સન્મધ્વપૂજારતેઃ
શ્રીમત્સાગરવેઙ્કટેશવિબુધાદ્યં શાન્તબાયી સુતમ્ ।
રામં પ્રાપ સુનીતિભાગવત ઉત્કૃષ્ટેઽત્ર તન્નિર્મિતે

સચ્છ્લોકૈર્દશભિઃ શુભૈર્વિલસિતઃ સ્કન્ધોઽગમદ્દ્વાદશઃ ॥ ૧૪॥

શ્રીમદ્ભાગવતાખિલાતિપૃથુલસ્કન્ધાર્થસમ્બોધિની
સદ્ભક્ત્યાવધૃતા ચતુઃશતલઘુશ્લોકીયમુર્વી બુધૈઃ ।
પાપં નાશયતિ હ્યશેષવિપદઃ શ્રીકૃષ્ણભક્તિં મહા-
સમ્પત્તિં ચ દદાતિ મુક્તિમતુલાં ધર્માર્થકામાન્ શુભમ્ ॥

ઇતિ શ્રીમત્સાગરવેઙ્કટેશાચાર્યપુત્રેણ રામેણ કૃતે
સુનીતિભાગવતે દ્વાદશઃ સ્કન્ધઃ સમાપ્તઃ ॥

શ્રીકૃષ્ણાય નમઃ । શ્રી વેદવ્યાસાય નમઃ ॥

The Suniti Bhagavatam of Sagara rAmAchArya of the 17th
Century is based on a manuscript at Sukrtindra Oriental
Research Institute, Cochin, Kerala. The author gives in
each verse a principle of right conduct in the first line,
and as an illustration of it, the story of the Bhagavata
in the second line.

Encoded and proofread by PSA Easwaran

*shrImatsunItibhAgavatam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*